॥ श्रीः ॥

हरिदास-संस्कृत-सीरिज़
१५

न्यायपञ्चाननश्रीविश्वनाथभट्टाचार्यविरचित

न्यायसिद्धान्तमुक्तावल्याः

शब्दखण्डाख्यो भागः

काशीस्थ श्री जो० म० गोयनकासंस्कृतमहाविद्यालया-
ध्यापक साहित्योपाध्याय न्यायव्याकरणाचार्य
श्रीसूर्यनारायणशुक्ल विरचितया हिन्दीभाषया
मयूखटीकया चोद्भासितः।

...an's Sri Sankaracharya San...
151
...ahavidyalaya

प्रकाशकः—
जयकृष्णदास हरिदास गुप्तः—
चौखम्बा संस्कृत सीरिज़ आफिस,
विद्याविलासप्रेस, गोपालमन्दिर के उत्तर फाटक,
बनारस सिटी।

९८८.

[illegible]धिकाराः प्रकाशकेन स्वायत्तीकृताः।

अथसङ्ग्रहः ।

परीक्षोपयोगि संस्कृतटोका टिप्पणी सहितः । मूल्य ।॥=)

बीजगणितम् ।

म० म० पं० श्रीसुधाकरद्विवेदिकृतोपपत्तिटीप्पणी सहितम् तथा म० म० पं० मुरलीधरशर्म विरचित लघूपपत्तिविशिष्टटिप्पणीनवीनाव्यक्तगणितोपयोगिप्रक्षिप्तविषयोपेतम् । मूल्य २)

लीलावती ।

ज्योतिषाचार्य पं० श्रीमुरलीधरठक्कुरकृत मध्यमापरीक्षा तथा शास्त्रीपरीक्षा प्रथम खण्डोपयोगि नवीनवासना परिशिष्टगणित तथा प्रश्न सहित । लीलावती के आज तक जीतने संस्करण छप चुके हैं उन सबसे अत्यन्त उत्तम उपयोगि तथा परीक्षोपयोगि संस्करण इस के अलावा दुसरा नहीं है । मूल्य लागत मात्र २॥)

मुहूर्तचिन्तामणिः ।

श्रीमद्गोविन्दविरचित पियूषधाराख्यव्याख्यासहितः । पं० श्रीअनूपमिश्रकृतयुक्तिमञ्जरीसमाख्यया नवीनगणितविषयोपपत्त्यादिटिप्पणी समलङ्कृतः । मूल्यम् ३)

मुहूर्तचिन्तामणिः ।

श्रीदैवज्ञरामाचार्यं विरचितया प्रमिताक्षराटीकयासहितः । पं० श्रीअनूपमिश्रविरचितया युक्तिलताख्यटिप्पण्या सहितः । मूल्यम् १॥)

सर्वविधपुस्तकप्राप्तिस्थानम्—

जयकृष्णदास-हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

विद्याविलासप्रेस, गोपालमन्दिर के उत्तरफाटक,

बनारस सिटी ।

श्रीगणेशाय नमः ।

हिन्दीभाषामयूखसहित

न्यायसिद्धान्तमुक्तावल्याः

शब्दखण्डः ।

[library stamp] 15

शाब्दबोधप्रकारं दर्शयति—

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥ ८१ ॥

पदज्ञानं त्विति । न तु ज्ञायमानं पदं करणं, पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात् ।

ज्ञायमानं पदमिति । ननु शब्दबोधस्यात्मनिष्ठत्वात्पदस्याकाशनिष्ठत्वात्कथं कार्यकारणभाव इति चेन्न स्वविषयकश्रावणप्रत्यक्षसमवायित्वसंबन्धेन पदस्याप्यात्मनिष्ठत्वेनादोषात् ।

मौनिश्लोकेति । मौनिपुरुषेण यत्र लिप्यादिना श्लोकादिर्लिखितस्तत्र लिप्या पदज्ञानेन शाब्दबोधो जायते तव तु न स्यात् पदाभावात् । एतेन उच्चरित एव शब्दः प्रत्यायक इति वैयाकरणोक्तं नादरणीयमिति भावः । आदिपदेन विजातीयहस्तचेष्टादेः संग्रहः ।

श्रीविश्वनाथपञ्चाननभट्टाचार्य शब्दखण्ड तथा उपमानखण्डका उपजीव्योपजीवकभावरूपसंगति दिखानेके अभिप्रायसे **'पदज्ञानं तु'** इस ग्रन्थसे शाब्दबोध कैसे होता है इस प्रकार को दिखलाते है ।

शाब्दबोधमें पदज्ञान करण है ज्ञानविषय अर्थात् श्रूयमाण पदतो करण नहीं है क्योंकि मौनी पुरुष निर्मित श्लोकसे शाब्दबोध होता है वहां पर श्रूयमाणपद नहीं है पदज्ञानको करणमाननेसे पद न सुनने पर भी लिपि विशेष या चेष्टादि से पदज्ञान होसकता है इससे शाब्दबोध होसकता है अतः पदज्ञान को शाब्दबोधके प्रतिकारण मानना चाहिये न कि श्रयमाण पदको ।

पदार्थधीरिति । पदजन्यपदार्थस्मरणं व्यापारः । अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः ।

तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् । अन्यथा घटादिपदात्समवायसम्बन्धेनाऽऽकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः ।

व्यापार इति । पदार्थस्मरणं हि पदज्ञानजन्यं पदज्ञानजन्यशाब्दबोधजनकं चेति भवति तस्य व्यापारत्वमिति भावः ।

प्रत्यक्षादिनेति । ननु पदज्ञानवतः प्रत्यक्षादिना घटादिपदार्थोपस्थितौ जायमानायां पदज्ञानजन्यत्वाभावाद् द्वारत्वासंभव इति चेन्न घटपदबोध्योऽयं घट इत्यस्यापि ज्ञानलक्षणया पदज्ञानजन्यत्वसंभवेन द्वारत्वसंभवात् ।

आकाशस्मरणे इति। एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्येत्यादिः।

तिस शाब्दबोधमें पदार्थज्ञान अर्थात् पदार्थोपस्थिति द्वार अर्थात् व्यापार है व्यापार उसे कहते है कि जो स्वजन्य होकर स्वजन्य का जनक हो जैसे पदार्थोपस्थिति पदज्ञानसे जन्य है तथा पदज्ञानजन्य शाब्दबोधका जनक भी है ।

शक्तिज्ञान सहकारिकारण है ऐसे स्थलमें शाब्दबोध रूप फल (कार्य) होता है । उपमान शक्ति का ग्राहक है इससे शाब्दबोध में उपजीव्य हुआ ।

शङ्का—कि जब पदज्ञान तथा पदार्थोपस्थिति शाब्दबोधमें करण है तो जहां पर घटपदको सुना परन्तु घटशब्द की शक्ति को नहीं जानता तथा प्रत्यक्ष घटको देखा उस स्थलमें पदज्ञान तथा पदार्थोपस्थिति रहते हुये शाब्दबोध क्यों नहीं होता ।

उत्तर—पदजन्य (पदज्ञानजन्य)पदार्थस्मरण याने पदार्थोपस्थिति व्यापार है न कि पदार्थोपस्थितिमात्र उक्तस्थलमें प्रत्यक्षसे पदार्थोपस्थिति हुई है न कि पदज्ञानसे ।

पदजन्य यहां पर पदशब्द पदज्ञान पर है क्योंकि पदकी कारणता का खण्डन कर पदज्ञानकी कारणता का पूर्व स्थापन कर चुके है ।

शंका—होती है कि जहां पर किसीने घटपद को सुना तथा घटपदनिष्ठशक्तिज्ञानाधीन जैसी घटकी उपस्थिति हुई उसी तरह पदका समवायेन आकाशको अधिकरण होनेके कारण एकसम्वन्धिज्ञानमपरसम्वन्धिस्मारकम् इसरीतिसे घट पदसे आकाशकी उपस्थिति हुई उस स्थलमें घटपदसे जैसे घटबिषयक शाब्दबोध उत्पन्न होता है उसी तरह आकाशविषयकशाब्दबोध क्यों ? नही होता है ।

उत्तर—वृत्या पदजन्यपदार्थोपस्थितिको व्यापारमानना अर्थात् जहां पर पदज्ञान

वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः । अत्रैव शक्तिज्ञानस्योपयोगः । शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः । पदज्ञानस्य हि एकसम्बधिज्ञानविधयार्थस्मारकत्वम् ।

शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । स चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः ।

अत्रैव पदजन्यपदार्थोपस्थितावेवेत्यर्थः ।

अस्माच्छब्दादयमर्थो बोद्धव्य इति । इदंपदोत्तरपञ्चम्या अभेदोर्थः शब्दपदोत्तरपञ्चम्या जन्यत्वमर्थः वुधधात्वर्थो ज्ञानम् तव्यप्रत्ययार्थः विषयताश्रयः । तत्र इदंपदार्थस्य पञ्चम्यर्थभेदे प्रतियोगित्वसंबन्धेन, तस्य च पञ्चम्यर्थाभावे प्रतियोगित्वसंबन्धेन, अभावस्य च स्वरूपसंबन्धेन शब्दपदार्थे, तस्य च पञ्चम्यर्थजन्यत्वसम्बन्धेन बोधे, तस्य निरूपितत्वसम्बन्धेन विषयतायाम्, तस्याश्च स्वरूपेण आश्रये, तस्याभेदेन अर्थे, अन्वयः । एवं च एतदभिन्नशब्दनिष्ठजनकतानिरूपितजन्यतावद्बोधविषयीभूताभिन्नः एदभिन्नोऽर्थ इति बोध इति पदप्रकारिका अर्थविशेष्यिका इयमिच्छा ।

तथापदनिष्ठवृत्तिज्ञानधीन पदार्थोपस्थिति हो उसी स्थलमें शाब्दबोध होता है उक्तस्थल में घटपदनिष्ठवृत्तिज्ञानाधीन घटकी उपस्थिति है आकाशकी घटपदनिष्ठवृत्तिज्ञानाधीन उपस्थिति नही है किन्तु एकसम्वन्धीका ज्ञान दूसरे सम्बम्धी का स्मारक है इस रीति से है अतः घटपदसे आकाशविषयकशाब्दवोध नही होता ।

शंका—वृत्ति किसे कहते है ।

उत्तर—शक्ति तथा लक्षणा रूप जो सम्वन्ध उसे वृत्ति कहते है पदज्ञानजन्यपदार्थोपस्थितिहीमें शक्तिका उपयोग है क्योंकि यदि पहिले शक्तिज्ञान न रहेगा तो पदज्ञान होने पर भी शक्ति सम्वन्ध या लक्षणारूप सम्वन्ध से स्मरण नही होसक्ता शक्य सम्बन्ध का नाम लक्षणा है जव शक्तिका ज्ञान न रहेगा तो शक्यसम्वन्ध रूपलक्षणाका ज्ञान सुतरां नहीं होसकता पदज्ञानको एकसम्वन्धिज्ञान की रीतिसे अर्थस्मारकता है जैसे हाथीका ज्ञान होने से हाथीवान् का या हाथीवान् के ज्ञानसे हाथीका ज्ञान होता है उसी तरह शक्तिरूपसम्वन्धका सम्वन्धी जो पद उसके ज्ञानसे अर्थ रूप दूसरे सम्वन्धी का ज्ञान होजाता है ।

पदके साथ पदार्थके सम्बन्ध विशेषका नाम शक्ति है वह सम्बन्धविशेष 'अस्माच्छब्दा-

आधुनिके नाम्नि शक्तिरस्त्येव–'एकादशेऽहनि पिता नाम कुर्यात्' इतीश्वरेच्छायाः सत्त्वात् । आधुनिकसङ्केतिते तु न शक्तिरिति सम्प्रदायः ।

नव्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव तेनाधुनिकसङ्केतितेऽपि शक्तिरस्त्येवेत्याहुः

नन्वीश्वरेच्छाया नित्यत्वादेकत्वाच्च 'घटपदाद्घटो बोद्धव्यः' 'पटपदात्पटो बोद्धव्य' इति समूहालम्बनात्मकेश्वरेच्छाविषयतायाः पटेऽपि सत्त्वेन पटस्य घटपदवाच्यत्वापत्तिः एवं गङ्गापदजन्यबोधविषयत्वप्रकारकेश्वरेच्छायास्तीरेऽपि सत्त्वाच्छक्त्यैव तीरबोधे लक्षणाया उच्छेदापत्तिश्चेति चेन्न—

तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन ईश्वरेच्छैव तत्पदशक्तिरिति स्वीकारेण 'तीरं बोधविषयो भवतु' 'बोधश्च गङ्गापदजन्यो भवतु'इति विश्रृङ्खलेश्वरेच्छाया लक्षणास्थले स्वीकारेण तीरनिष्ठविशेष्यताया बोधविषयतात्वावच्छिन्नप्रकारतानिरूपितत्वेऽपि गङ्गापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितत्वाभावान्न तादृशसम्बन्धेनेश्वरेच्छावत्त्वं तीरस्येति न लक्षणोच्छेदः 'घटो घटपदाद्बोद्धव्यः' 'पटः पटपदाद्बोद्धव्य' ईदृश्या ईश्वरेच्छाया शक्तिस्थले स्वीकारेण घटपदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेनेश्वरेच्छाया घटे एव सत्त्वेन पटे न घटपदवाच्यत्वव्यवहार इत्याशयात् ।

ननु आधुनिकपाणिन्यादिसङ्केतितनदीवृद्ध्यादिपदाद्बोधो न स्यादीश्वरेच्छारूपशक्तेरभावादित्यस्वरसादाह *नव्यास्त्विति* ।

दयमर्थोबोद्धव्यः' याने 'इस पदसे यह अर्थ जानना चाहिये' ऐसी जो ईश्वर की इच्छा तद्रूप है ।

शंका—जो पिता माता आदि देवदत्त यज्ञदत्त ऐसा पुत्र का नामकरते है वहां तो ईश्वरेच्छारूप शक्ति नही है सो इन पदोंसे शक्तिज्ञानाधीनपदार्थोपस्थिति न होनेसे बोध नहीं होना चाहिये ।

उत्तर—आधुनिक नाम अर्थात् पित्रादिकृत देवदत्तादिनाममें ईश्वरेच्छा रूप शक्ति विद्यमान ही है केवलपित्रादिकृतनामकरणरूपव्यवहारसे जानी जाती है जैसे घटपदमें वर्तमान ही शक्ति का कोशादिसे ज्ञान होता है ।

'एकादेशेऽहनि पिता नाम कुर्यात्' अर्थात् ग्यारहवे दिन पिता पुत्रका नाम रक्खे यह ईश्वरसंकेत रूप शक्ति विद्यमान है । आधुनिक संकेतित नदी वृद्ध्यादि

शक्तिग्रहस्तु व्याकरणादितः । तथाहि—

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः ॥

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति। क्वचित्सति बाधके त्यज्यते । यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते । चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः । तच्च गौरवात्त्यज्यते । किन्तु कृतौ शक्तिग्रहो लाघवात् । कृतिश्चैत्रादौ प्रकारीभूय भासते ।

अपभ्रंशगगर्यादिपदाद्बोधस्तु उभयमतेऽपि शक्तिभ्रमादेवेति मन्तव्यम् ।

धात्विति । प्रकृतिःप्रातिपदिकम् । धातोः प्रकृतित्वेऽपि ब्राह्मणवशिष्ठन्यायेन पृथगुक्तिः ।

*व्याकरणादिति । भूसत्तायां 'वर्तमानेलडि*त्यादिव्याकरणादित्यर्थः ।

वैयाकरणैरिति । फलव्यापारौ धात्वर्थः । कर्तृप्रत्यये कर्ता, कर्मप्रत्यये कर्म, प्रत्ययार्थः। कालसंख्ये चोभयत्र प्रत्ययार्थः । तत्र देवदत्तादेरभेदेन एकत्वस्य च स्वरूपसम्बन्धेन प्रत्ययार्थे आश्रयेऽन्वयः तस्य कालस्य च वृत्तित्वसम्बन्धेन व्यापारे कर्मणश्च वृत्तित्वसम्बन्धेन फलेऽन्वयः । फलस्य च अनुकूलत्वसंम्बन्धेन व्यापारेऽन्वयः ।

पदमें तो शक्ति नहीं है ऐसा सांप्रदायिकलोक कहते है ।

नवीनलोकतो ईश्वरेच्छाको शक्तिरूप नहीं मानते किन्तु इच्छाही को शक्ति मानते है तिससे आधुनिकसंकेतित नदी वृध्यादि पदमेंभी 'यूस्त्र्याख्यौ नदी' 'वृद्धिरादैच्' इत्यादिसूत्रबलसे पाणिनीच्छा रूपशक्ति रहती ही है ।

वह शक्तिग्रह व्याकरणादि आठ उपायोंसे होसकता है जैसे व्याकरण उपमान कोष आप्तवाक्य व्यवहार वाक्यशेष विवरण सिद्धपद अर्थात् गृहीतशक्तिक पदका संनिधि इन आठ उपायोंसे शक्तिग्रह होता है ऐसा वृद्धलोक मानते है धातु प्रकृति—अर्थात् प्रातिपदिक प्रत्ययका शक्तिग्रह व्याकरणसे होता है कहीं पर बाधकके रहनेसे व्याकरणसे गृहीत शक्तिका त्यागभी होजाता है ।

जैसे वैयाकरण लोक तिङ्की शक्ति कर्तामें मानते है और चैत्रः पचति इस स्थलमें तिबर्थकर्ताके साथ चैत्रका अभेद अन्वय होता है कर्ताका वृत्तित्व सम्बन्धसे व्यापारमें प्रत्ययार्थकालकाभी वृत्तित्वसम्बन्धसे उसी व्यापारमें अन्वय होता है

न च कर्तुरनभिधानाच्चैत्रादिपदानन्तरं तृतीया स्यादिति वाच्यम् , कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात् ।

एवं च देवदत्तस्तडुलं पचतीत्यत्र देवदत्ताभिन्नैकत्वावच्छिन्नाश्रयवृत्तिः तण्डुलनिष्ठ-विक्लित्यनुकूलो वर्तमानकालिको व्यापार इति बोधः, देवदत्तेन तण्डुलः पच्यते इत्यत्र देवदत्ताभिन्नकर्तृवृत्तिवर्तमानकालिकव्यापारजन्यतण्डुलाभिन्नैकत्वावच्छिन्नाश्रयवृत्ति-र्विक्लित्तिरिति बोधः इति वैयाकरणाः ।

कर्तरि कर्मणि च लस्य शक्तिस्वीकारे कर्तृत्वं कृतिमत्त्वं तच्च कृतिः, कर्मत्वं फलवत्त्वं तच्च फलमेव शक्यतावच्छेदकं,कृतौ फले च शक्तिस्वीकारे शक्यतावच्छेदकलाघव-मतो नैयायिकैः कृतौ फले च शक्तिरुपेयते इति । एतन्मते च देवदत्तस्तण्डुलं पचतीत्यत्र तण्डुलवृत्तिविक्लत्यनुकूलव्यापारानुकूलवर्तमानकालिककृतिमानेकत्वावच्छिन्नोदेवदत्त इति बोधः, देवदत्तेन तण्डुलःपच्यते इत्यत्र च देवदत्तवृत्तिकृतिजन्यव्यापारजन्य-विक्लित्त्याश्रय एकत्वावच्छिन्नस्तण्डुल इति बोधः ।

तत्र–तृतीयायाम् ।

तन्त्रत्वादिति।प्रयोजकत्वादित्यर्थः। अयंभावः *अनभिहिते* इत्यस्य *कर्तृकरणयोस्तृतीये*त्येतदेकवाक्यतापन्न*द्व्येकयोर्द्विवचनैकवचने इति संख्यावाक्येनान्वयात

प्रत्ययार्थ संख्याका अन्वय प्रत्ययार्थकर्ता में होता है तिससे 'चैत्राभिन्नैकत्वावच्छिन्नकर्तृवृत्तिर्वर्तमानकालिको विक्लित्त्यनुकूलो व्यापारः' ऐसा बोध 'चैत्रः पचति' से वैयाकरणोंके मतमें होता है परन्तु गौरव होनेके कारण वैयाकरणाभिमत शक्तिको छोड नैयायिकलोककृतिमें शक्तिमानते है कर्तामें शक्तिमाननेसे शक्यतावच्छेदककर्तृत्वकृतिरूप मानना पडेगा इससे गौरव होगा कृतिमें शक्तिमाननेसे शक्यतावच्छेदक कृतित्वजातिरूप पडेगा उसमें लाघव होगा ।

शङ्का—यदि नैयायिक कृतिमें तिङ्की शक्ति मानते हैं तो चैत्रः पचति यहां पर चैत्र पदसे तृतीया होजायगी क्योंकि अनुक्तकर्तामें **अनभिहिते** इस अधिकारसे कर्तृकरणयोस्तृतीया इस सूत्रसे तृतीयाविभक्ति होजायगी तव चैत्रेण पचति इस प्रयोगकी साधुता होने लगेगी ।

उत्तर—कर्तृगतसंख्याके अनुक्त होनेसे तृतीयाविभक्ति होती है । 'चैत्रः पचति' यहां पर कर्तृगत संख्या उक्त है अतः तृतीया विभक्ति नही होगी अभिप्राय यह है कि कर्तृकरणयोस्तृतीया द्व्येकयोर्द्विवचनैकवचने अनाभिहिते इन सूत्रोंकी एकवाक्यता

संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः । कर्मत्वादीत्यस्येतरविशेषणत्वतात्पर्याविषयत्वमर्थः तेन चैत्र इव मैत्रो गच्छतीत्यादौ न चैत्रे संख्यान्वयः । यत्र कर्मादौ न विशेषणत्वे तात्पर्यं तद्वारणाय प्रथमान्तेति ।

कर्तृगतैकत्वेऽनभिहिते तृतीयैकवचनम् एवं कर्मगतैकत्वेऽनभिहिते द्वितीयैकवचनमित्यर्थः *न तु* अनभिहिते कर्मणि कर्तरि वेत्यर्थः एवं च कर्तृसङ्ख्यानभिधानस्यैव तृतीयाप्रयोजकत्वमिति ।

*कर्मत्वाद्यनवरुद्ध इति। 'चैत्रः पचति तण्डुल' इत्यत्र कर्मत्वादिलाक्षणिकप्रथमान्तपदोपस्थाप्ये तण्डुलादौ संख्यान्वयवारणाय कर्मत्वाद्यनवरुद्ध इति दलम् ।

ननु चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रस्य इवार्थसादृश्ये प्रतियोगितासम्बन्धेन सादृश्यस्य च अनुयोगितासम्बन्धेन मैत्रेऽन्वयात् 'संयोगानुकूलव्यापारानुकूलकृतिमान् चैत्रसदृशो मैत्र' इति बोधस्तत्र तिबर्थैकत्वस्य चैत्रेऽन्वयः चैत्रस्य कर्मत्वानवरुद्धत्वात्प्रथमान्तपदोपस्थाप्यत्वाच्च किं च पक्वमन्नं भुज्यते इत्यत्र पाककर्मत्वस्यान्नेऽन्वयेन-प्रथमान्तपदोपस्थाप्यत्वेऽपि कर्मत्वावरुद्धत्वात् अन्ने संख्यानन्वयापत्तिरतः कर्मत्वाद्यनवरुद्ध इत्यस्यार्थमाह-*इतरविशेषणत्वतात्पर्याविषयत्वमिति* । चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रस्य इवार्थविशेषणत्वेन तात्पर्यविषयत्वान्न तत्र संख्यान्वयः पक्वमन्नं भुज्यते इत्यत्र अन्नस्य इतरविशेषणत्वेन तात्पर्यविषयत्वाभावात्संख्यान्वय इति भावः विशेषणत्वतात्पर्याविषयत्वमित्येव सिद्धे इतरपदं व्यर्थमिति ध्येयम् ।

होनेसे कर्तृगत एकत्व संख्याके अनुक्त होनेसे तृतीया का एकवचन हो ऐसा अर्थ होगा तिससे कर्ता का अनुक्तत्व तृतीयाका प्रयोजक नहीं है । किन्तु कर्तृगत संख्याका अनुक्तत्वही तृतीया का प्रयोजक है ।

शङ्का—यह कैसे जाना जाय कि कर्तृगत संख्या कहां उक्त है कहां अनुक्त है ।

उत्तर—कर्मत्वसे अनवरुद्ध तथा प्रथमान्तपदोपस्थाप्य जो होगा उसीकी संख्या तिङ्से उक्त होनेके योग्य होती है । कर्मत्वाद्यनवरुद्ध इसका पारिभाषिक अर्थ इतरविशेषणत्वेन तात्पर्याविषय समझना चाहिये ।

एवं 'चैत्र इव मैत्रो गच्छति' इस स्थलमें गमधातूत्तर तिप्से चैत्रकी संख्या उक्त न होगी किन्तु मैत्रहीकी संख्या उक्त होगी क्योंकि चैत्रका इवार्थ सादृश्यमें प्रतियोगितया अन्वय होनेसे इतरविशेषणत्व प्रकारकतात्पर्यविषयही चैत्र है ऐसे स्थलमें 'ग्रामवृत्तिसंयोगानुकूलव्यापारानुकूलकृतिमानेकत्वावच्छिन्नचैत्रप्रतियोगिकसादृश्यानुयो-

यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः । तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वारणम् ।

ननु चैत्र एव पचतीत्यत्र 'चैत्रेतरावृत्तिपाककृतिमान् चैत्रः' इति बोधात् चैत्रस्य विशेषणत्वेन तात्पर्यविषयत्वात संख्यानन्वयापत्तिः किं च चैत्रश्चैत्रंपश्यतीत्यत्र चैत्रे संख्यानन्वयापत्तिः 'चैत्रवृत्तिचक्षुः संयोगजन्यज्ञानाश्रयश्चैत्र' इति बोधे चैत्रस्य विशेषणत्वेन तात्पर्यविषयत्वादिति चेन्न—

इतरविशेषणत्वमात्रेण तात्पर्याविषयत्वमित्यर्थात् एवं च प्रकृते चैत्रे विशेष्यत्वस्यापि सत्त्वेन विशेषणत्वमुख्यविशेष्यत्वाभ्यां तात्पर्यविषयत्वात् विशेषणत्वमात्रेण तात्पर्याविषयत्वात्संख्यान्वये बाधकाभावात् । एवं च तण्डुलं पचतीत्यादौ यत्र विशेषणत्वमुख्यविशेष्यत्वाभ्यां तण्डुलस्यैवान्वयो विवक्षितः तत्र तण्डुले संख्यान्वयवारणाय* प्रथमान्तेति दलम्* । किं च चैत्रेण सुप्यत इत्यत्र धात्वर्थस्वापे संख्यान्वयवारणाय प्रथमान्तेति दलम् ।

द्वितीयदलस्य प्रकारान्तरेण प्रयोजनं वक्तुमन्यथा प्रथमदलार्थमाह *यद्वेति* ।

गी मैत्रः' यह वोध होगा चैत्र एव पचति यहां पर 'चैत्रेतरावृत्तिविक्लित्त्यनुकूलव्यापारानुकूलकृतिमान् एकत्वावच्छिन्नः चैत्रः' ऐसा वोध होता है सो नहीं होना चाहिये क्योंकि चैत्रपदार्थ अन्ययोगव्यवच्छेदरूप एवकारार्थ घटक भेदमें विशेषण है अतः इतरविशेषणत्वेन तात्पर्याविषय नही है तव चैत्र की संख्या उक्त न होगी अतः उक्तस्थलमें तृतीया होनी चाहिये इसलिये इतरविशेषणत्वेन तात्पर्याविषयत्व इसका इतरविशेषणत्वमात्रेण तात्पर्याविषयत्व यह अर्थ करना पडेगा प्रकृतमें चैत्र विशेष्यत्वेन भी विवक्षित है अतः चैत्रकी संख्या उक्त हुई अब जहां 'तण्डुलं पचति' प्रयोग किया और ताण्डुलको ही कर्मत्वेन तथा कर्तृत्वेन विवक्षा किया तब वहां पर तण्डुलका इतरविशेषणत्वमात्रेण तात्पर्यविषयता नही है अतः वहां ताण्डुलनिष्ठ संख्या उक्त होने लगेगी इससे प्रथमान्तपदोपस्थाप्य भागका निवेश है—

प्रकारान्तरसे 'कर्मत्वाद्यनवरुद्धः'का अर्थ करके वतलाते हैं **यद्वा इति**—कर्मत्वाद्यनवरुद्धमाने धात्वर्थातिरिक्ताविशेषण अर्थात् धात्वर्थसे अतिरिक्तमें विशेषण न हो तिससे चैत्र इव मैत्रो गच्छति यहां पर चैत्रमें संख्यान्वय नहीं हुआ क्योंकि चैत्र धात्वर्थसे अतिरिक्त इवार्थ सादृश्यमें प्रतियोगिता सबन्धसे विशेषण ही है मैत्र किसीमें विशेषण नहीं इससे उसमें संख्यान्वय हुआ ।

स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय च द्वितीयदलम् । तस्य द्वितीयान्तपदोपस्थाप्यत्वाद्वारणमिति ।

एवं व्यापारेऽपि न शक्तिर्गौरवात् । रथो गच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा । जानातीत्यादौ आश्रयत्वे नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा ।

फलं धात्वर्थो व्यापारः प्रत्ययार्थ इति मीमांसकैकदेशिमण्डनमतं खण्डयितुमाह—*एवं व्यापारेऽपीति* ।

गौरवादिति। व्यापारसमूहरूपक्रियाया वाच्यत्वे गौरवं कृतित्वापेक्षयेति भावः। जन्यत्वघटितस्य व्यापरत्वस्य कृतित्वजात्यपेक्षया गुरुत्वमित्यन्ये ।

नन्वाख्यातस्य यत्नार्थकत्वं न सम्भवति रथोगच्छतीत्यत्र व्यभिचारादत आह—*रथो गच्छति* इत्यत्र व्यापारे लक्षणाङ्गीकारपक्षे 'संयोगानुकूलव्यापारानुकूलव्यापारवान् एकत्वावच्छिन्नोरथः' इति बोधः । यदि तु रथोगच्छतीत्यत्र गमनानुकूलव्यापारस्य न बोधः किन्तु गमनाश्रयत्वस्यैवेति नवीनमतमाश्रित्य आश्रयत्वे लक्षणा तदा "संयोगानुकूलव्यापाराश्रयतावान्' इति बोधः। कृते रथेऽन्वयानुपपत्तिरिह लक्षणा बीजम् ।

अब 'स्तोकं पचति' यहां पर स्तोक पदार्थ धात्वर्थविक्लित्तिमें अभेद संबन्धसे यद्यपि विशेषण है परन्तु धात्वर्थसे अतिरिक्तमें विशेषण नहीं है अतः उसमें संख्यान्वय होने लगेगा सो न हो इसके लिये 'प्रथमान्तपदोपस्थाप्यः' यह दल दिया स्तोक 'क्रियाविशेषणानां कर्मत्वम्' इस शास्त्रसे द्वितीयान्तपदोपस्थाप्य है अतः संख्यान्वय नहीं हुआ ।

एवं फलं धात्वर्थः, व्यापारः लार्थः, करोतिश्च व्यापारवचनः, यह मीमांसकमत भी युक्त नहीं क्योंकि लकारकी व्यापारमें शक्ति माननेसे फूत्कारचुल्युपरिधारणादिमें शक्ति होनेसे गौरव होगा अथवा जन्यत्वघटितव्यापारत्वमें शक्तिकी अपेक्षा यत्नत्वावच्छिन्नमें शक्ति माननेसे लाघव होगा ।

शङ्का—नैयायिक कृतिमें लकारकी शक्ति मानते हैं उनके मतमें रथोगच्छति नहीं होगा क्योंकि रथमें गमनानुकूलकृति बाधित है ।

उत्तर—रथोगच्छति यहां पर लकारकी व्यापार या आश्रयत्वमें लक्षणा है तिससे 'संयोगानुकूलव्यापारानुकूलव्यापारवान् रथः' यह अथवा 'संयोगानुकूलव्यापाराश्रयत्ववान् रथः' यह बोध होगा । एवं देवदत्तो जानाति यहां पर 'ज्ञानाश्रयो देवदत्तः' इस बोधके अनुरोधसे आश्रयत्वमें लकारकी लक्षणा माननी चहिये तथा 'घटो नश्यति' यह

उपमानाद्यथा शक्तिग्रहस्तथोक्तम् ।

एवं कोशादपि शक्तिग्रहः । सति बाधके क्वचित्त्यज्यते । यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोशेन व्युत्पादिता तथापि लाघवान्नीलादावेव शक्तिः नीलादिविशिष्टे तु लक्षणेति ।

एवमाप्तवाक्यादपि । यथा 'कोकिलः पिकपदवाच्यः' इत्यादिशब्दात्पिकादिपदानां कोकिले शक्तिग्रहः ।

एवं व्यवहारादपि । यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम्, तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतस्तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेति शब्द-

कोशेनेति । गुणे शुक्लादयः पुंसि गुणि लिङ्गास्तु तद्वतीति कोशेनोभयत्र शक्तिबोधनादिति भावः ।

नीलादावेव शक्तिरिति । नीले शक्तौ नीलत्वं शक्यतावच्छेदकमिति लाघवम्, नीलविशिष्टे शक्तौ नीलः शक्यतावच्छेदकमिति गौरवमिति भावः ।

पर 'नाशप्रतियोगी घटः' इस बोधके अनुरोधसे प्रतियोगित्वमें लकारकी निरूढ माने अनादि तात्पर्यवती लक्षणा है ।

एवं गोनिरूपितगवयनिष्ठसादृश्यप्रत्यक्ष रूप उपमानसे जैसे 'गवयो गवयपदवाच्यः' इत्याकारकशक्तिग्रह होता है उसे हम उपमाननिरूपण में कह चुके हैं ।

एवं कोशसे भी पदनिष्ठशक्तिका ज्ञान होता है परन्तु यदि कोई बाधक हो तो वह शक्तिग्रह छोड़ दिया जाता है । जैसे नीलादि पदोंकी नीलरूप तथा नीलरूपविशिष्ट मे 'गुणे शुक्लादयः पुंसि गुणि लिङ्गास्तुतद्वति' इस कोशसे शक्ति गृहीत हुई तथापि नीलरूपमें शक्ति माननेसे नीलत्वरूपजातिशक्यतावच्छेदक होगी इससे लाघव है नीलविशिष्टमें शक्ति मानने से नीलगुणशक्यतावच्छेदक होगा उसके अनेक होनेसे गौरव है अतः नीलमें शक्ति नीलविशिष्टमें लक्षणा यहां शक्तिमाननेमें गौरव रूपबाधक है ।

ऐसेही यथार्थवक्तापुरुषके वचनसे भी पदशक्ति का ग्रहण होता है जैसे पिक शब्दका न अर्थ जाननेवाला बालक किसी योग्य पुरुषसे पूछा कि पिक किसको कहते हैं तो उस योग्यपुरुषने कहा कि कोकिल पिकशब्दसे कहा जाता है ऐसे स्थलमें आप्त वचनसे पिकशब्दका शक्तिग्रह हुआ ।

इसी तरह व्यवहारसे भी शक्तिग्रह होता है—जैसे प्रयोजक वृद्धने 'घटमानय'

प्रयोज्यमित्यवधारयति । ततश्च घटं नय गामानयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति ।

इत्थं च भूतले नीलो घट इत्यादिवाक्यान्न शाब्दबोधः । घटादिपदानां कार्यान्वितघटादिबोधे सामर्थ्यावधारणात् कार्यताबोधं प्रति च लिङादीनां सामर्थ्यात्तदभावान्न शाब्दबोध इति केचित्—

तन्न प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात् ।

आवापोद्वापाभ्यामिति । आवापः कस्यचित्पदस्य प्रक्षेपः । उद्वापः कस्यचित्पदस्य निस्सारणम् ।

गृह्णातीति । घटानयनं प्रवृत्तिजन्यं चेष्टात्वात् मदीयस्तनपानादिचेष्टावदित्यनुमानेन घटानयनगोचरप्रवृत्तिः मनुमाय साप्रवृत्तिः कार्यताज्ञानजन्या घटानयनादिधर्मिक प्रवृत्तित्वात मदीयप्रवृत्तिवदित्यनुमानेनानुमितघटानयनादिधर्मिकार्यताज्ञाने कार्यताज्ञानं पदज्ञानजन्यं तदन्वयव्यतिरेकानुविधायित्वादित्यनुमानेन किंचित्पदज्ञानजन्यतामनुमाय तद्दृष्टान्तेन पदत्वावच्छेदेन कार्यताज्ञानजनकत्वं निश्चिनोति बाल इतिभावः । केचित्–प्राभाकराः ।

सामर्थ्यावधारणादिति । प्रभाकरमते शक्तिर्द्विधा उपस्थापिका आनुभविकी च तत्र घटादिपदानां घटत्वादावुपस्थापिका कार्यत्वान्वितघटादावानुभाविकी । एवं च कार्यत्वान्वितघटशाब्दत्वावच्छिन्नं प्रति घटपदज्ञानं कारणम् । लाघवेनेति । कार्यत्वान्वितघटशाब्दत्वापेक्षया घटशाब्दत्वस्य कार्यतावच्छेदकत्वे लाघवमिति भावः ।

ऐसा कहा उसे सुनकर प्रयोज्य वृद्धने घटको ले आया इस बातको जानकर पार्श्वस्थ बालक घटानयनरूपकार्य 'घटमानय' शब्दसे जन्य है ऐसा निश्चय किया तब 'घटं नय, गामानय' ऐसा आवाप याने किसीपदको डाल देना उद्वाप माने किसी पदको निकाल देना इन दोनोंसे घट पदकी आनयनरूपकार्यान्वित घटमें शक्ति ग्रहण करता है।

(इत्थं) इस रीतिसे 'भूतलेनीलोघटः' इत्यादि शब्दोंसे शाब्दबोध नहीं होता क्योंकि घटादिपदोंका कार्यान्वितघटादिबोधमेंसामर्थ्य निश्चित है कार्यताबोधकेप्रतिलिङादिका सामर्थ्य है प्रकृतमें लिङादिकशब्द नहीं है अतः शाब्दबोध नहीं होता ऐसा प्रभाकर मानते हैं। सो ठीक नहीं क्योंकि पहिले पहिल बालकको यद्यपि घटादिके आवाप व उद्वापद्वारा घटादिपदोंकी कार्यान्वितघटादि ही में शक्तिग्रह होता है तथापि घटपदका कार्यान्वितघटविषयकशाब्दबुद्धित्वकी अपेक्षा घटविषयकशाब्दबुद्धित्वको कार्य्यतावच्छेदक

अत एव-चैत्र पुत्रस्ते जातः; कन्या ते गर्भिणी जाता-इत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णीय तद्धेतुतया तं शब्दमवधारयति । तथाच व्यभिचारात्कार्यान्विते न शक्तिः ।

न च तत्र तं पश्येत्यादि शब्दान्तरमाध्याहार्यं, मानाभावात । चैत्रपुत्रस्ते जातो मृतश्चेत्यादौ तदभवाच्च ।

सुखःदुखे इति । देवदत्तः सुखी मुखप्रसादवत्त्वात्, देवदत्तो दुःखी मुखमालिन्यवत्त्वात्, इत्यनुमानम् ।

शाब्दवोधमिति । देवदत्तवृति दुःखं सुखं वा शाब्दवोधजन्यं शाब्दवोधेतरकारणाजन्यत्वे सति कारणजन्यत्वादिति अनुमानाकारः ।

तद्धेतुतयेति दुःखकारणीभूतः शाब्दवोधः प्रकृतवाक्यजन्यः अन्यथासिद्ध्यनिरूपकत्वे सति प्रकृतवाक्यानन्तरभावित्वादिति ।

माननेमें लाघव है इसलिये कार्यान्वितघटमें जो शक्ति निश्चय हुआ है पीछेसे उसका त्यागही उचित है अत एव कार्यत्वाविषयकशाब्दबोधके प्रति पदोंको कारणता है ।

इसलिए चैत्र पुत्रस्ते जातः कन्याते गर्भिणी जाता-अर्थात् हे चैत्र तेरे पुत्र उत्पन्न हुआ है और कन्या तेरी गर्भिणी हुई है इस वाक्यके उच्चारणस्थलमें समीपवर्ती तीसरा पुरुष प्रथमवाक्य सुननेसे चैत्रके मुखकी प्रसन्नता तथा द्वितीयवाक्य सुननेसे मुख की मलीनता जानने से चैत्रके सुख या दुःखका अनुमान करके उस सुख दुःखकी करणता उस कालमें और किसीमें प्रतीत नहीं होती तो परिशेषसे मैत्रके उच्चारण किये शब्दजन्यबोधमें करणताका निश्चय करके तादृशशाब्दबोधहेतुत्वेन मैत्रोच्चारित शब्द ही का निश्चय कराता है तथाच 'घटादिपदानां कार्यान्वितघटादिबोधएवसामर्थ्यम्' इत्याकारकनियमका 'चैत्रपुत्रस्ते जातः' इत्यादि स्थलमें व्यभिचार होनेसे घटादिपदोंकी कार्यान्वित घटादिमें शक्ति मानना उचित नहीं ।

शङ्का—'चैत्रपुत्रस्ते जातः' इत्यादि स्थलमें 'तं पश्य' इत्यादि क्रियापदके अध्याहार करनेसे पूर्वोक्तव्यभिचार नहीं है ।

समाधान—'तं पश्य' इत्यादि पदोंके अध्याहार करनेमें कोई प्रमाण नहीं है और 'चैत्रपुत्रस्ते जातो मृतश्च' इत्यादि स्थलमें पश्य इत्यादि कार्यताबोधकपदका अध्याहार हो भी नहीं सकता ।

इत्थञ्च लाघवादन्वितघटेऽपि शक्तिं त्यक्त्वा घटपदस्य घटमात्रे शक्तिमवधारयति।

एवं वाक्यशेषादपि शक्तिग्रहः । यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः कङ्गौ च म्लेच्छानाम् । तत्र हि–'यदान्या ओषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठन्ति'

वसन्ते सर्वसस्यानां जायते पत्रशातनम् ।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ।।

मीमांसकैकदेश्यन्विताभिधानवादिमतं दूषयति इत्थं चेति । इदं हि तेषामाकूतम्--घटादिपदानां जातौ शक्तिर्व्यक्तिबोधश्चाक्षेपात् अन्वयस्याशक्यत्वादाक्षेपासंभवाच्चाशक्यस्यालक्ष्यस्य च शाब्दबोधे भानोपगमेऽतिप्रसङ्गः स्यादिति अन्वयेऽपि शक्तिरङ्गीकार्येति ।

लाघवादिति* । अन्वितघटशाब्दत्वस्य पदज्ञानजन्यतावच्छेदकत्वापेक्षया घटशाब्दत्वस्य जन्यतावच्छेदकत्वे लाघवमिति भावः । अन्वयबोधस्तु आकाङ्क्षया तार्किकमते लक्षणया च भाट्टमते इति ध्येयम् । यत्तु दिनकरेण भट्टमतं प्रतिक्षिपन्स्वमतमुपसंहरति इत्थं चेत्युक्तं तत्तु भट्टमतानवबोधविजृम्भितम् । न हि भट्टोऽन्विताभिधानवादी शास्त्रदीपिकादौ भट्टमतानुयायिभिरन्विताभिधानवादस्य निराकृतत्वादित्यलं परगृहकुदृष्टिपातेन ।

यवमय इति । तदुक्तं न्यायमालाविस्तरे—

यवादिशब्दाः किं द्व्यर्था, नो वार्यम्लेच्छसाम्यतः ।
दीर्घशूकप्रियंग्वाद्या, द्वयेप्यर्था विकल्पिताः ॥
यत्रान्या इति शास्त्रस्था, प्रसिद्धिस्तु बलीयसी ।
शास्त्रीयधर्मे तेनात्र, प्रियंग्वादि न गृह्यते ॥

शङ्का—पश्य का अध्याहार न होनेसे यदि कार्यान्वित घटमें शक्तिग्रह नहीं हो सकता तो भी अन्वित घटमें ही शक्ति मानो ।

उत्तर—इत्थं च (इस रीतिसे) लाघवसे यही कहना होगा कि अन्वित घटमें शक्तिग्रहको छोड़कर केवल घटमें घटपदका शक्तिग्रह करना ऐसा निश्चय बालक को होता है ।

एवं वाक्यशेषसे भी शब्दकी शक्तिका ग्रहण होता है जैसे 'यवमयश्चरुर्भवति' इस वाक्यमें आर्य याजक लोक 'यव' पदको दीर्घशूकवाले यवविशेषमें शक्ति

इति वाक्यशेषाद्दीर्घशूके शक्तिर्निणीयते, कङ्गौ तु शक्तिभ्रमात्प्रयोगो नानाशक्तिकल्पने गौरवात्। हर्यादिपदे तु विनिगमकाभावान्नानाशक्तिकल्पनम्।

एवं विवरणादपि शक्तिग्रहः। विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम् यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणाद्धटपदस्य कलशे शक्तिग्रहः। एवं पचतीत्यस्यपाकं करोतीत्यनेन विवरणादाख्यातस्य यत्नार्थकत्वं कल्प्यते।

एवं प्रसिद्धपदस्य सांनिध्यादपि शक्तिग्रहः। यथा इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिकपदस्य कोकिले शक्तिग्रह इति।

मानते हैं और म्लेच्छलोक (यव) पदसे 'कङ्गु' काकुनि का ग्रहण करते हैं ऐसा होनेसे यवमयश्चरुर्भवति इस स्थलमें सन्देह हुआ कि यवपदसे जवोंका ग्रहण करना चाहिये या काकुनिका तो प्रकरणान्तमें 'यदान्या ओषधयः' इत्यादि वाक्यशेषसे अर्थात् वसन्तऋतुमें सब के पत्र गिर जाते हैं परन्तु 'यव' कणिशशाली रहते हैं अर्थात् दीर्घशूक विशिष्ट हुये प्रफुल्लित खड़े रहते हैं इत्यादि वाक्यशेषसे 'यव' पदकी दीर्घशूक विशेषमें शक्तिका निर्धारण होता है म्लेच्छोंका यव पदसे काकुनिका ग्रहण करना शक्तिभ्रम मूलक समझना चाहिये यव पदकी काकुनि तथा दीर्घशूक विशिष्ट उभयमें शक्ति मानना ठीक नहीं क्योंकि नाना शक्ति कल्पनामें गौरव है।

'हरि' आदि पदोंमें तो एकत्र शक्तिका नियामक कोई नहीं इससे नानाशक्ति कल्पना करनी पड़ती है।

ऐसेही विवरणसे भी शक्ति ग्रह होता है उस पदके समानार्थक पदसे उस पद का अर्थ कहना कहाता हैं विवरण। जैसे घटोऽस्ति इसका कलशोऽस्ति इससे विवरण होनेसे घटपदका कलशमें शक्ति ग्रह होता है पचति का पाकं करोति विवरण होनेसे आख्यात का यत्न अथ मानते हैं।

ऐसेही प्रसिद्धार्थक पदके सन्निधिसे भी पद की शक्ति का ग्रहण होता है जैसे किसीने कहा कि 'इह सहकारतरौ मधुरं पिको रौति' अर्थात् इस आम्रके पेड़ पर कोकिला मधुर बोल रही है तो ऐसे स्थलमें पिक पदके विना सभी पदोंके अर्थके जाननेवाले पुरुषको 'सहकार' आम्रादि पदोंकी सहायतासे पिक पदकी शक्ति कोकिला नामक पक्षि विशेषमें स्वयं ग्रहण हो जाती है।

तत्र जातावेव शक्तिर्न तु व्यक्तौ—व्यभिचारादानन्त्याच्च । व्यक्तिं विना जातिभानस्यासम्भवाद्व्यक्तेरपि भानमिति केचित् ।

तन्न शक्तिं विना व्यक्तिभानानुपपत्तेः ।

मीमांसकमतमाह—*तत्र जातावेति* । जातिविशिष्टव्यक्तौ शक्तिस्वीकारे 'नागृहीतविशेषणा बुद्धिर्विशेष्यमधिगच्छति' इति न्यायाज्जातौ शक्तिग्रहस्यावश्यकतया जातावेव शक्तिर्लाघवात् न तु जातिविशिष्टव्यक्तौ तदुक्तं 'विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे' इति तेषामभिप्रायः ।

ननु व्यक्तावेव शक्तिरस्तु न जातावित्यत आह—*न तु व्यक्ताविति* अयं भावः व्यक्तिशक्तिपक्षे एकस्यां व्यक्तौ शक्तिरस्ति सर्वासु वा नाद्यः अगृहीतशक्तिकव्यक्तावपि विषयता सम्बन्धेन शाब्दबोधरूपकार्यस्य सत्त्वेन शक्तिग्रहरूपकारणस्याभावेन व्यतिरेकव्यभिचारात न द्वितीयः व्यक्तिभेदेन शक्तिभेदात् शक्त्यानन्त्यप्रसङ्गादिति जातिशक्तिपक्षे तु न व्यभिचारो न वा शक्त्यानन्त्यमिति ।

जातिभानस्यासम्भवादिति । जातिभासकसामग्र्या एव व्यक्तिभासकत्वादिति भावः । इदमेव कथमिति चेदुच्यते व्यक्तिविशेष्यकजातिप्रकारकशब्दबोधे जातिविषयकशक्तिज्ञानस्य हेतुतया व्यक्तिं विना जातिभानासम्भव इति ।

तथाच जातिविशेष्यकशक्तिज्ञानं बोधे जातिभासकं व्यक्तिभासकं चेति भावः ।

व्यक्तिभानानुपपत्तेरति। वृत्त्या पदजन्यपदार्थोपस्थितेः शाब्दबोधे हेतुतया व्यक्तौ

उसमें भी मीमांसक लो घटादि पदकी घटत्वादि जाति हीमें शक्ति कहते हैं कम्बुग्रीवादिमद्व्यक्तिमें नहीं उसमें कारण यह है कि व्यक्तिमें शक्ति माननेसे यदि एकही व्यक्तिमें शक्ति मानी जाय तो वाक्यान्तरका भी बोध होता है इससे शक्तिग्रह व बोधके कार्यकारणभावका व्यभिचार होगा अर्थात् शक्ति अन्य व्यक्तिमें बोध अन्य व्यक्तिका हुआ इससे कारणाभावे कार्योत्पादरूपव्यतिरेकव्यभिचारभया। यदि सकल व्यक्तिमें शक्ति मानें तो व्यक्तियोंके अनन्त होनेसे शक्त्यानन्त हुआ जातिमें शक्ति माननेसे जात्या सकल व्यक्तिमें शक्ति गृहीत हुई इससे व्यभिचार नहीं और जातिके एक होनेसे आनन्त्य भी नहीं व्यक्तिके विना जातिका भान होही नहीं सकता इससे जातिभासके सामग्री ही से व्यक्तिका भान हो जायगा व्यक्तिमें शक्ति मानने की कोई आवश्यकता नहीं यह मीमांसक लोग कहते हैं ।

नैयायिक उसका उत्तर करता है—

न च व्यक्तौ लक्षणा, अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात् ।

न च व्यक्तिशक्तावानन्त्यम्, सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात् ।

न चाननुगमः, गोत्वादेरेवानुगमकत्वात् ।

शक्तिं विना व्यक्तेर्भानं न स्यादिति भावः । *लक्षणेति* तावतैव वृत्तिप्रयोज्यपदार्थोपस्थितेः सत्त्वेन व्यक्तिबोधसम्भवादिति भावः ।

अनुपपत्तिप्रतिसंधानमिति । गामानयेत्यादौ गोत्वे आनयनान्वयानुपपत्त्या गोपदस्य गोव्यक्तौ लक्षणासम्भवेऽपि गौरस्तीत्यत्र गोत्वेऽस्तित्वान्वयेऽनुपपत्त्यभावेन अन्वयानुपपत्तिरूपलक्षणावीजस्यासत्त्वेन च न लक्षणासम्भव इति भावः। मीमांसका हि अन्वयानुपपत्तिमेव लक्षणावीजं वदन्ति न तात्पर्यानुपपत्तिं तन्मते वेदस्यापौरुषेयतया इच्छारूपतात्पर्यस्याभावेन 'आदित्यो यूप' इत्यत्र तात्पर्यानुपपत्त्यभावेन लक्षणाभावप्रसङ्गात् ।

ननु शक्तिं विनापि व्यक्तिभानं भविष्यति सर्वत्र पदजन्यपदार्थोपस्थितेः हेतुत्वेमानाभावात् कथमन्यथा शाब्दबोधे संसर्गभानम् । नचैवं पदानुपस्थितघटादेरपि

तन्नेति—यदि व्यक्तिमें पदकी शक्ति नहीं है तो व्यक्तिका भान हो ही नहीं सकता इससे व्यक्तिमें शक्ति माननी चाहिये ।

शंका—व्यक्तिका भान शक्तिके बिना भी लक्षणासे हो सकता है ।

उत्तर—अन्वयानुपपत्ति या तात्पर्यानुपपत्तिके प्रतिसंधानसे लक्षणा होती है व्यक्तिका बोध तो अनुपपत्ति प्रतिसंधानके विना भी होता है इससे लक्षणासे निर्वाह नहीं हो सकता ।

शंका—यदि व्यक्तिमें शक्ति मानोगे तो शक्त्यानन्त्य रूप दोष है ।

उत्तर—सकल घट व्यक्तियोंमें एक ही शक्ति मानेंगे इससे शक्त्यानन्त्यरूप दोष नहीं ।

शंका—घटादिक व्यक्तियोंके अननुगत होनेसे विषयतासंबन्धेन शक्तिज्ञानकारणतामें अननुगम होगा ।

उत्तर—घटत्वगोत्वादिधर्मोंसे अनुगम हो सकता है अर्थात् गो विषयकशाब्दबोधके प्रति गोत्वविशिष्टविषयकशक्तिज्ञानत्वेन कारणताके होनेसे अननुगम रूप दोष नहीं ।

किञ्च गौः शक्येति शक्तिग्रहो यदि तदा व्यक्तौ शक्तिः। यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात् समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति हेतुत्वात्। किञ्च गोत्वे यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यम्, गोत्वत्वं तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम्, तथाच गोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशात्तवैव गौरवम्।

शाब्दबोधे भानापत्तिरिति वाच्यम्। गोविशेष्यकगोत्वप्रकारकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन हेतुत्वस्याङ्गीकारेणादोषादित्यपरितोषादाह *किञ्चेति*।

व्यक्तौ शक्तिरिति। गौः शक्येति विशिष्टज्ञानं प्रमात्मकमेव तव [प्रभाकरस्य] मतेऽन्यथाख्यात्यभावात् प्रमायाश्च वस्तुसाधकत्वदिति भावः।

समानप्रकारकत्वेनेति। गोत्वप्रकारकपदार्थस्मरणं, गोत्वप्रकारकशाब्दबोधं, च प्रति गोत्वप्रकारकशक्तिज्ञानस्य हेतुत्वादिति भावः।

अत एवापूर्ववादेऽपूर्वस्य पूर्वमनुपस्थितत्वात् कथं तत्र शक्तिग्रह इत्याशङ्क्य कार्यत्वेन घटादिषु शक्तिग्रहात् कार्यतया शाब्दबोधेऽपूर्वभानमित्युक्तम्।

ननु कार्यत्वाद्युपाधिप्रकारकशाब्दबोधस्थले समानप्रकारकशक्तिज्ञानस्य हेतुत्वेऽपि जातिप्रकारकशाब्दबोधस्थले समानप्रकारकशक्तिज्ञानस्य न हेतुतेति नायं दोष इत्यरुचेराह *किं चेति*।

'किञ्च' यदि 'गौः गोपदशक्यः' इत्याकारक शक्तिज्ञान हुआ तो व्यक्ति हीमें शक्ति अनुभव सिद्ध है और यह विशिष्टज्ञान प्रमात्मक भी हो सकता है क्योंकि मीमांसा सिद्धान्तमें अन्यथाख्याति अस्वीकार है और यदि 'गोत्वं गोपदशक्यम्' इत्याकारक शक्तिज्ञान हुआ तो गोपद से गोत्वप्रकारकगोव्यक्तिकास्मरण तथा गोत्वप्रकारक गोविशेष्यकबोधका उदय नहीं होना चाहिये क्योंकि यह नियम है कि यत्प्रकारकयाद्विशेष्यकशक्तिग्रहण हो वह शब्दशक्तिग्रहण तत्प्रकारकताद्विशेष्यकस्मरण तथा तत्प्रकारकताद्विशेष्यकशाब्दबोध के प्रति कारण होता है।

'किं च' यदि गोपदकी 'गोत्वं' जाति ही में शक्ति मान लीजाय तो शक्यतावच्छेदकधर्म गोत्वत्व होगा वह गोत्वत्व 'गवेतरासमवेतत्वे सति सकलगोसमवेतत्वरूप अर्थात् गोव्यक्तिसे इतरव्यक्तियोंमें असमवेत होकर सकलगोव्यक्तिमें समवेत होना ही गोत्वत्व है इस रीतिसे गोव्यक्तियोंका शक्यतावच्छेदककोटिमें प्रवेश होनेसे तथा शाब्दबोधकी कारणतावच्छेदककोटिमें प्रवेश होनेसे आप ही को गौरव होगा।

तस्मात्तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति ।

शक्तं पदम्, तच्चतुर्विधम्-क्वचिद्यौगिकं, क्वचिद्रूढं, क्वचिद्योगरूढं, क्वचिद्यौगिकरूढम्, तथाहि—

यत्रावयवार्थ एव बुध्यते तद्यौगिकम्, यथा पाचकादिपदम् ।

तच्छब्दस्य वक्तृबुद्धिविषयतावच्छेदकीभूतघटत्वाद्यवच्छिन्ने शक्तिः ।

ननु तत्पदे घटत्वादीनां शक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदाच्छक्तिभेदापत्तिः न च शक्यतावच्छेदकानां भिन्नत्वेऽपि शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविषयतावच्छेदकत्वस्यैक्यान्न शक्तिभेद इति वाच्यम् तस्य शक्यतावच्छेदकतावच्छेदकत्वे शाब्दबोधे तद्भानापत्तेरिति चेन्न—बुद्धिविषयतावच्छेदकत्वस्योपलक्षणतया शक्यतावच्छेदकतावच्छेदकत्वात् उपलक्षणस्य शाब्दबोधे भानानङ्गीकारात् ।

विशेषणत्वं च तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वम् ।

उपलक्षणत्वं च तत्पदजन्यबोधविषयत्वेन शक्त्यविषयत्वमिति ॥

इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदोरूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥

इत्यभियुक्तोक्तेः—

इदमः प्रत्यक्षबुद्धिविषये शक्तिः । एतदः समीपतरप्रत्यक्षबुद्धिविषये शक्तिः । अदसः विप्रकृष्टप्रत्यक्षविषये शक्तिः । तदः परोक्षबुद्धिविषये शक्तिः ॥

किं पदस्य जिज्ञासाविषयत्वविशिष्टे शक्तिः ।

सर्वपदस्य व्यापकत्वविशिष्टे शक्तिः 'सर्वे घटा रूपवन्तः' इत्यत्र घटत्वव्यापकं रूपवत्त्वमिति बोधात् ।

क्वचिदिति । किंचिदित्यर्थः एवमग्रेऽपि ।

'तस्मात्' इसलिये केवल जातिमें या 'आकृति' अवयवसंस्थानमें या व्यक्तिमात्रमें शक्ति माननेसे' तत्तत्' उस २ गोत्वादि जाति तथा 'तत्तत्' उस २ शृङ्गसास्नादि अवयवसंस्थानविशिष्ट 'तत्तत्' उस २ गो आदि व्यक्तियोंके बोधके अनुपपत्ति होनेसे बुद्धिपूर्वक शक्तिकी कल्पना जात्याकृतिविशिष्टमें विश्रान्त होती है ।

शक्तिविशिष्टका नाम है पद वह चार प्रकार का होता है कहीं यौगिक है १ कहीं रूढ है २ कहीं योगरूढ ३ और कहीं यौगिक रूढ है ४ ।

जो अपने अवयवों से स्वार्थ का बोधक हो वह यौगिकपद है ऐसे पाचक

यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढम्, यथा गोमण्डलादिदम्।

यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम्, यथापङ्कजादिपदम्। तथाहि—पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति।

न च केवलयाऽवयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम्, रूढिज्ञानस्य केवलयौगिकार्थज्ञाने प्रतिबन्धकत्वादिति प्राञ्चः।

पद्मं बोधयतीति। पङ्कजनिकर्त्रभिन्नं पद्ममिति बोधः।

प्रतिबन्धकत्वादिति। न च रूढिज्ञानस्य यौगिकार्थबुद्धिं प्रति प्रतिबन्धकत्वे पङ्कजशब्दात्पद्ममित्येव बोधः स्यान्न तु पङ्कजनिकर्त्रभिन्नं पद्ममिति वाच्यम्। पद्मत्वावच्छिन्नविशेष्यत्वानिरूपितपङ्कजनिकर्तृत्वावच्छिन्नविषयताकशाब्दबुद्धित्वावच्छिन्नं प्रति रूढिज्ञानस्य प्रतिबन्धकत्वेन पद्मविशेष्यकयौगिकार्थबुद्धेः प्रतिबध्यता-

---

पाठक आदिपद है 'पचतीति पाचकः' यहां 'पच' धातु है कर्तामें 'ण्वुल्' प्रत्यय का विधानहै एवं 'पठतीति पाठकः' यहां 'पठ' धातु है कर्तामें 'ण्वुल्' प्रत्यय का विधान है एवं पाकक्रिया करने वाले का 'पाचक' तथा पाठक्रिया करने वालेका 'पाठक' शब्दके अवयवों से ही बोध हुआ ।। १ ।।

जो अवयवशक्तिके विना समुदायशक्ति से स्वार्थ का बोधक हो वह रूढ पद है। ऐसे गो मण्डल आदिपद है अर्थात् यहां 'गो' पद की समुदाय शक्ति गो व्यक्तिमें है और मण्डल पद की समुदायशक्ति सूर्यादिरोधक कुण्डलाकारमें है एवं यहां समुदायशक्ति से बोध होता है इस लिये अवयव शक्ति की कुछ आवश्यकता नहीं ॥ २ ॥

एवं जो पद अवयव तथा समुदाय उभयशक्ति द्वारा स्वार्थका बोधक हो वह योगरूढ है ऐसे पङ्कजादि पद है (तथाहि) वह ऐसे है कि एकही 'पङ्कज' पद अपनी 'पङ्काज्जायते इति पङ्कजः' इत्याकारक अवयवशक्ति से पङ्कसे उत्पन्न होनेवाली वस्तुको कहता है और समुदाय शक्ति से पद्मत्वेन रूपेण (पद्म) कमलका बोधक है

शङ्का—केवल अवयव शक्ति से ही 'पङ्कज' पदका (कुमुद) श्वेतोत्पलमें यदि प्रयोग मान लिया जाय तो क्या हानि है।

वस्तुतस्तु समुदायशक्त्युपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति-सानिध्यात्

यत्र तु रूढ्यर्थस्य वाधः प्रतिसन्धीयते तत्र लक्षणया कुमुदादेर्बोधः । यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानं पद्मत्वस्य च वाधस्तत्रावयवशक्तिमात्रेण निर्वाह इत्यप्याहुः ।

यत्र तु स्थलपद्मादाववयवार्थवाधस्तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः । यदि तु स्थलपङ्कजं विजातीयमेव तदा लक्षणयैवेति ।

यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढम् यथोद्भिदादि-

---

वच्छेदकानाक्रान्तत्वेनादोषात् तदेतदाह—*केवलयौगिकार्थज्ञाने इति* । एवं प्रतिबध्यप्रतिबन्धकभावस्वीकारे विरोधिविषयकज्ञानस्य प्रतिबन्धकत्वं जनकज्ञानविघटकत्वेनैवेति नियमभङ्गरूपोऽस्वरसः प्राञ्च इत्यनेन सूचितः ।

मणिकारमतमाह *वस्तुतस्त्विति ।

*स्वातन्त्र्येणेति । विशेष्यविशेषणभावानवगाहित्वेनेत्यर्थः ।

उत्तर—ऐसे स्थलमें प्राचीनलोक रूढिज्ञानको केवल यौगिकार्थज्ञानका प्रतिबन्धक मानते हैं इस लिये अवयव शक्ति से 'पङ्कज' पदका श्वेतोत्पलमें प्रयोग मानना उचित नहीं ।

और वास्तवमें तो यह वार्ता है कि समुदायशक्तिद्वारा उपस्थित हुये पद्ममें अवयवार्थ पङ्कसे उत्पन्न होने वालों का सान्निध्यसे अन्वय होता है ।

अभिप्राय यह है कि अवयवशक्तिसे भी प्रथम समुदायशक्ति द्वारा उपस्थित वस्तु ही का लाभ होता है और जिस स्थलमें रूढशक्ति के अर्थ का बाध प्रतीत होवे अर्थात् अर्थ न वन सके वहां लक्षणा वृत्तिसे कुमुदादि बोधमें ही वक्ताका तात्पर्य जानना चाहिये और जहां कुमुदत्वेन रूपेण कुमुदके बोधमें वक्ताका तात्पर्य ज्ञान नहीं है और पद्मत्वेन रूपेण पद्मका जहां वाधप्रतीत हो रहा है वहां केवल अवयवशक्तिमात्रसेही निर्वाह करना उचित है ऐसे भी कहते हैं

जहां कहीं (स्थल) सूखी भूमिमें उत्पन्न हुये पद्म आदिमें पङ्कज शब्दके अवयवार्थका वाधप्रतीत हो वहां समुदायशक्तिही से पद्मत्वेन रूपेण पद्मका बोध होता है और यदि स्थलमें होने वाला पद्म जलमें उत्पन्न हुये पद्मसे विलक्षण अभिमतहो तो उसमें पङ्कजपद की लक्षणाही माननी चाहिये ॥ ३ ॥

एवं जिससे अवयवार्थ तथा रूढ्यर्थ का स्वतन्त्र रूपसे बोध हो अर्थात् वस्तु

पदम् । तत्र हि उद्भेदनकर्ता तरुगुल्मादिरपि बुध्यते यागविशेषोऽपीति ॥ ८१ ॥

लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः ।

लक्षणेति । गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोध इति ।

लक्षणयैवेति । रूढ्यर्थतावच्छेदकपद्मत्वजातेस्तत्राभानेन रूढ्या तद्बोधनासम्भवादिति भावः ।

शक्तिमात्रेणेति । मात्रपदेन लक्षणानादरः सूचितः ।

यागविशेषोऽपीति । 'उद्भिदा यजेत पशुकाम' इत्यत्र उद्भिच्छब्दो यागविशेषनामधेयम् तथाच न्यायमाला—

गुणोऽयं नामधेयं वा, खनित्रेऽस्य निरुक्तितः ।
ज्योतिष्टोमं समाश्रित्य, पश्वर्थं गुणचोदना ॥
फलोद्भेदात्समानैषा, निरुक्तिर्यागनाम्न्यपि ।
नामत्वमुचितं याग, सामानाधिकरण्यतः ॥ इति ॥

तात्पर्यानुपपत्तिर्वेति । ननु गङ्गापदाच्छक्त्यैव तीरबोधो किमिति लक्षणाङ्गीकरणीयेति चेन्न-तथा सति तीरे गङ्गापदस्य स्वारसिकप्रयोगापत्तेः । गङ्गात्वापेक्षया गङ्गातीरत्वस्य गुरुतया शक्यतावच्छेदकत्वकल्पनस्यानौचित्याच्च। न च नानार्थस्थलेऽपि एकत्र शक्तिरन्यत्रलक्षणास्त्वितिवाच्यम् विनिगमकाभावेन सर्वत्र शक्तिसिद्धेः यत्र तु लाघवादिकं विनिगमकं तत्र न नानाशक्तिकल्पनम् यथानीलादिपदेइति ध्येयम् ।

प्रतिसन्धीयते इति । प्रतिसंधानं—स्मरणम् ।

विशेषको अवयवशक्तिसे तथा अन्य वस्तु को समुदाय शक्तिसे बोध करे वह 'यौगिकरूढ' है ऐसे उद्भिद् आदिपद है 'ऊर्ध्वंभिनत्तीति उद्भिद्' इस व्युत्पत्तिसे अवयवशक्ति द्वारा (तरुगुल्म) वृक्षलतादिका बोधक है और समुदाय शक्तिसे उद्भिद् नामक याग का भी बोधक है ॥ ४ ॥

शक्य के सम्बन्ध विशेषका नाम लक्षणा है और तात्पर्यानुपपत्ति लक्षणा में वीज है ।

जहत्स्वार्था अजहत्स्वार्था भेदसे लक्षणादो प्रकार की है उसमें प्रथम 'गङ्गायां घोषः' इत्यादि वाक्यस्थलमें गङ्गापदके शक्यार्थ-प्रवाह (घोष) पदार्थ आभीर पल्लीका अन्वय नहीं होसकता और घोषपदार्थ आभीरपल्लीका गङ्गापदके शक्यार्थ

सा च शक्यसम्बन्धरूपा । तथाहि—प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात्तीरस्य स्मरणम् । ततः शाब्दबोधः ।

परन्तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात्—यष्टिषु प्रवेशान्वयस्यानुपपत्तेरभावत् । तेन यष्टिप्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा ।

एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा—सर्वतो दधिरक्षायास्तात्पर्यविषयत्वात् ।

एवं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वे लक्षणा । इयमेवाजहत्स्वार्था लक्षणेत्युच्यते । एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात् ।

छत्रिपदस्येति इदं वाक्यलक्षणावादिमताभिप्रायेण । न्यायमते तु छत्रपदस्यैकसार्थवाहित्वे लक्षणा प्रत्ययार्थश्च सम्बन्धी एकसार्थवन्तो गच्छन्तीत्यन्वयः एकसार्थवाहित्वमेकसार्थ एव नत्वेकसार्थगन्तृत्वं निराकाङ्क्षतया यान्तीत्यस्यानन्वयापत्तेः ।

प्रवाहमें अन्वयकरनेसे वक्ताका तात्पर्य भी नहीं बन सकता क्योंकि जलप्रवाहमें आभीरपल्ली की स्थिति का संभव नहीं है इसलिये 'गङ्गायां घोषः' इस वाक्यमें गङ्गापद स्वशक्यार्थ प्रवाहके तीरमें लाक्षणिक है परम्परा सम्बन्ध से स्वार्थ बोधन करने वाला पद लाक्षणिक होता है प्रकृतमें स्वशक्यार्थसंयोगरूप गङ्गापदका तीर से परम्परा सबन्ध है इसलिये गङ्गा पद लाक्षणिक है ऐसे स्थलमें लक्षणावृत्ति ही से तीरका बोध होता है ।

वह लक्षणा शक्यसंबन्ध रूप होता है (तथाहि) वह ऐसे है कि प्रवाह रूप जो शक्यार्थ उसका संयोग संबन्ध तीरके साथ गृहीत ही है गङ्गा पदसे गङ्गातीरका स्मरण हुआ तदनन्तर 'गङ्गातीरे घोषः यह शाब्दबोध हुआ परन्तु हर एक स्थलमें यदि अन्वयानुपपत्तिही लक्षणा का बीज मानी जाय तो 'यष्टीः प्रवेशय' इत्यादिस्थल में लक्षणा नहीं होगी क्योंकि (यदि) लाठियों का प्रवेशके साथ अन्वयानुपपत्ति नहीं है अर्थात् केवल लाठियों का भी प्रवेश में अन्वय हो सकता है परन्तु कहने वाले ने भोजन तात्पर्यसे यष्टियों के प्रवेश की आज्ञा की है एवं केवल लाठियोंके प्रवेश से भोजन रूप तात्पर्यकी अनुपपत्ति होने से यष्टिपद की यष्टिधरमें लक्षणा करनी चाहिये अर्थात् वक्ता अपने भृत्यको कहता है कि लाठी वाले साधुवों को

यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्, तदा क्वचिद्गङ्गापदस्य तीरे, क्वचिद्घोषपदस्य मत्स्यादा, लक्षणेति नियमो न स्यात्।

इदन्तु बोध्यम्। शक्यार्थसम्बन्धो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः। यदि तु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम्। अत एव लक्ष्यतावच्छेदके न लक्षणा—तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः। परन्तु एवं क्रमेण शक्यतावच्छेदकेऽपि शक्तिर्न स्यात्, तत्प्रकारकशक्यार्थस्मरणं प्रति तत्पदस्य

एकसार्थवाहित्वे—एकसार्थवाहित्वविशिष्टे।

शक्तिर्न स्यादिति। लक्ष्यतावच्छेदके लक्षणाया अनङ्गीकारेण तीरं गङ्गातीरं वा प्रवाहसंयोगवदिति लक्षणाग्राहेण कदाचित्तीरत्वेन कदाचिद् गङ्गातीरत्वेन बोधो भवति तद्वच्छक्यतावच्छेदके शक्तेरनङ्गीकारे पृथिवीपदात्कदाचिदष्टद्रव्यातिरिक्तद्रव्यत्वेन

भोजन करनेके लिये गृहके भीतर ले जावो इत्यादि एवं 'काकेभ्यो दधिरक्ष्यताम्', 'छत्रिणो यान्ति' इत्यादि स्थलोंमें 'अजहत्स्वार्था लक्षणा' है यहां 'काक' पदकी दधिके विघातक बिडालादि जीवमात्रमें लक्षणा है क्योंकि यहां वक्ताको भृत्यादिके प्रति कहने का तात्पर्य यह है कि 'दृष्टि रक्खो काक या और कोई जीव दधिको भक्षण न करजावे इति एवं 'छत्रिणो यान्ति' इस स्थलमें छत्रिपदकी एकसार्थवाहित्व विशिष्टमें अर्थात् एकसाथ चलने वाले पुरुषमात्रमें लक्षणा है क्योंकि यहां भी छातेवाले पुरुषका तथा उनके साथियों का एक सार्थवाहित्वेन रूपेण बोध होता है।

लक्षणास्थलमें यह नियम है कि जिस स्थलमें जो पद वक्ताने जिस अर्थ बोधके तात्पर्यसे उच्चारणकिया है वह पद उसी अर्थमें अवश्यलाक्षणिक होता है परन्तु अन्वयानुपपत्ति लक्षणा का बीज मान लिया जाय तो कहीं गङ्गा पद की तीरमें और कही घोष पदकी मत्स्यादि जलजीवों में लक्षणा नहीं होनी चाहियें क्योंकि 'गङ्गा' पदका तीरमें तात्पर्यग्रहस्थलमें एवं घोषपदका मत्स्यादिमें तात्पर्यग्रहस्थल में घोषकी तीरमें तथा मत्स्यादिकों की प्रवाह में अन्वयानुपपत्ति नहीं है।

यह भी यहां जानने योग्यहै कि शक्यार्थ प्रवाह का संबन्ध यदि तीरत्वेन रूपेण तीरके साथ ग्रहण हुआ है तो शाब्दबोध भी तीरत्वेन रूपेण तीरही का होगा

सामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयम् ।

यत्र तु शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते । यथा द्विरेफादिपदात् रेफद्वयसम्बन्धो भ्रमरपदे ज्ञायते भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते इति तत्र लक्षितलक्षणा ।

कदाचिद्गन्धवत्त्वेन कदाचित्पृथिवीत्वेन पृथिव्या बोधापत्तिः । पृथिवी पृथिवी पदशक्येतिवदष्टद्रव्यातिरिक्तद्रव्यं पृथिवीपदशक्यमित्यादेरपि शक्तिग्रहस्य संभवात् तथा च यथा लक्षणाया यत्किंचिदेकधर्मावच्छिन्नविषयक एव शाब्दबोध इति न नियमस्तथा शक्त्याबोधेऽप्यनियमः स्यादिति शक्यतावच्छेदके शक्तिस्वीकार आवश्यकः शक्यतावच्छेदकः शक्यतान्यूनानतिरिवृत्तिर्लघुधर्म एवेति पृथिवीत्वादेरेव शक्यतावच्छेदकत्वं नत्वष्टद्रव्यातिरिक्तद्रव्यत्वादेर्गौरवादिति ध्येयम् ।

विभावनीयमिति । तद्धर्मावच्छिन्ने शक्तिज्ञानं तद्धर्मावच्छिन्नविशेष्यकशाब्दबोधे हेतुरन्यथागवादिपदाद्गोत्वादेः शाब्दबोधे प्रकारत्वं न स्यात् एवञ्च शक्यतावच्छेदके शक्त्यभावेऽपि पृथिवीपदशक्तिप्रमया पृथिवीत्वप्रकारक एव शाब्दबोधः शक्तिभ्रमे तु गन्धवत्त्वादिना बोधो भवत्येवेति चिन्ताबीजम् ।

परम्परासम्बन्धरूपा—स्ववाच्यरेफद्वयघटितपदवाच्यत्वरूपा ।

और यदि गङ्गातीरत्वेन रूपेण तीरका संबन्ध गृहीत हुआ है तो शाब्दबोध भी गङ्गातीरत्वेन रूपेण ही होगी । इसीसे तद्धर्मविशिष्टमें लक्षणा ग्रहणको तिसी रूपसे पदार्थो पस्थिति तथा शाब्दबोधके प्रति हेतुता होने ही से लक्ष्यतावच्छेदक तीरत्वादिधर्मोंमें भी लक्षणा मानने का कुछ काम नहीं क्यों कि तीरत्वादिधर्मप्रकारक तीरविशेष्यकबोध लक्षणा के विना भी ऐसे स्थलमें उत्पन्न होता है परन्तु इसी क्रमसे शक्यतावच्छेदकमें शक्ति नहीं माननी चाहिये क्यों कि लक्षणा स्थलकी तरह यहां भी 'तत्तद्घटत्वादिप्रकारकघटादिस्मरणके प्रति तत्तद्घटादि पदका सामर्थ्य है, इत्याकारकनियम बन सकता है परन्तु आचार्य लोकोंने लक्ष्यतावच्छेदकमें लक्षणाको नहीं माना और शक्यतावच्छेदकमें शक्तिको माना है इसका क्या कारण है यह वार्ता विचारणीय है ।

जिसस्थलमें शक्यार्थ का परम्परासम्बन्धरूपा लक्षणाहै वह लक्षितलक्षणा कही जाती है जैसे 'द्विरेफो रौति' इस स्थलमें द्विरेफादिपदमें रेफद्वय का सम्बन्ध 'भ्रमर' इस पदमें जानाजाता है और 'भ्रमर' पदका भ्रमरमें जाना जाता है ऐसे

किन्तु लाक्षणिकं पदं नानुभावकम् । लाक्षणिकार्थस्य शाब्दबोधे तु पदान्तरं कारणम्–शक्तिलक्षणान्यतरसम्बन्धेनेतरपदार्थान्वितस्वशक्यार्थशाब्दबोधं प्रति पदानां सामर्थ्यावधारणात् ।

वाक्ये तु शक्तेरभावाच्छक्यसम्बन्धरूपा लक्षणापि नास्ति । यत्र गभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे लक्षणा । गभीरापदार्थस्य नद्या सहाभेदेनान्वयः—क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात् ।

ननु तच्छाब्दबोधे तच्छक्तज्ञानत्वेन हेतुत्वाल्लाक्षणिकाच्छाब्दबोधः कथमित्याह—*किन्त्विति* । पदान्तरं—समभिव्याहृतं शक्तं पदमित्यर्थः ।

सामर्थ्यावधारणादिति । 'कुमतिः पशुः' इत्यादौ सर्वलाक्षणिकस्थले शाब्दबोधस्यानुभवसिद्धतया लाक्षणिकार्थस्याप्यानुभावकत्वम् अत्र हि मतिशब्दस्य-कुत्सितमतिमति,लक्षणा कुपदं तात्पर्यग्राहकं पशुशब्दस्य च पशुसदृशे लक्षणेति सर्वलाक्षणिकत्वं बोध्यमिति नवीनाः ।

नास्तीति । ननु 'गभीरायां नद्यां घोष' इत्यत्र नदीपदस्य नदीतीरे लक्षणायां गभीरपदार्थस्यैकदेशान्वयापत्तिरतो वाक्यलक्षणाङ्गीकर्तव्येति शङ्कां समाधत्ते—*यत्र गभीरायामिति* ।

क्वचिदिति । चैत्रस्य गुरुरित्यादौ षष्ठ्यर्थनिरूपितत्वस्य स्वरूपेण गुरुत्वेऽन्वयेन चैत्रनिरूपितं यद् गुरुत्वं तदाश्रयस्य कुलमित्यर्थेनैकदेशान्वयस्य दर्शनादिति ।

स्थलमें लक्षित लक्षणा कही जाती है । 'द्विरेफोरौति' ऐसेस्थलोमें 'स्ववाच्यरेफद्वय-घटितपदवाच्यत्व' रूप सम्बन्ध होता है ।

'किन्तु' परन्तु 'लाक्षणिक' पद 'अनुभावक' शाब्दबोधका जनक नहीं होता किन्तु लाक्षणिकार्थ के शाब्दबोधमें पदान्तर' घोषादि पदान्तर कारण है क्योंकि शक्ति सम्बन्धसे उपस्थित जो 'इतरपदार्थ' तीरादि उसतीरादिके साथ अन्वित जो (स्व) घोषादिपद(शक्यार्थ) आभीरपल्ली तादृशतीरायान्वित आभिरपल्लीविषयकशाब्द-बोधकेप्रति घाषादिपदों कासामर्थ्य निश्चित है ।

वाक्यमें तो शक्ति नहीं है इससे शक्यसम्बन्धरूपलक्षणाभी नहीं हो सकती ।

जहां 'गभीरायां नद्यां घोषः' ऐसा कहा वहां नदीतीरमेंलक्षणा और गभीरापदार्थका नदीके साथ अभेदेन अन्वय होने से 'गभीराभिन्नानदीतीरेघोषः' यह बोधहोताहै ।

यदि तत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गभीरनदीतीरे लक्षणा गभीरपदं तात्पर्यग्राहकम् ।

बहुव्रीहावप्येवम् । तत्र हि चित्रगुपदादौ यदैकदेशान्वयः स्वीक्रियते तदा गोपदस्य गोस्वामिनि लक्षणा गवि चित्राभेदान्वयः यदि तत्रैकदेशान्वयो न स्वीक्रियते, तदा गोपदस्य चित्रगोस्वामिनि लक्षणा, चित्रपदं तात्पर्यग्राहकम् ।

एवमारूढवानरो वृक्ष इत्यत्र वानरपदस्य वानरारोहणकर्मणि लक्षणा, आरूढपदं तात्पर्यग्राहकम् । एवमन्यत्रापि बोध्यम् ।

तात्पर्यग्राहकमिति। अत्र मीमांसकाः, वाक्यलक्षणयैव कार्यनिर्वाहे गभीरपदस्य तात्पर्यग्राहकत्वकल्पनमयुक्तम् न च वाक्ये शक्तेरभावात् शक्यसम्बन्धरूपलक्षणा न सम्भवतीति वाच्यम् । स्वबोध्यसम्बन्धस्यैव लक्षणापदार्थत्वेनादोषात् एवं च गभी-

---

शङ्का—'नित्योघटः' इस प्रयोगे के वारणकेलिये 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' ऐसा नियम माना गया है एवं च यदि नदी पदकी नदी तीरमें लक्षणा है तोनदी पदार्थैकदेशभया उसमे गभीरापदार्थका अन्वय कैसे होगा वाक्यही में स्वबोध्यसम्बन्धरूपलक्षणमाननी चाहिये ।

उत्तर—'गभीरायां नद्यां घोषः' इत्यादिस्थलमें केवल नदीपदका नदीतीरमें लक्षणा है और गभीरा पदार्थ का नदीके साथ अन्वयहै (क्वचित्) चैत्रस्य गुरुकुलम्' इत्यादि स्थलोंमे एकदेशान्वयभी माना गया है उसीतरह प्रकृतमें एकदेशान्वयमानने में कोई क्षति नही । 'चैत्रस्य गुरुकुलम्' इसस्थलमें 'चैत्रानिरूपितगुरुत्ववत्कुलम्' ऐसा वोधहोताहै ।

परन्तु यदि यहां एकदेशान्वय न स्वीकारकरो तो नदी पदका गभीर नदी तीरमें लक्षणा गभीरापदतात्पर्यग्राहक है ।

बहुव्रीहिमें भी इसीतरह जानना (तत्र) बहुव्रीहिमें चित्रगुपदमें यदि एकदेशान्वयस्वीकार करते हो तो गोपदका गोस्वामीमे लक्षणा चित्र का गोके साथ अभेदान्वय चित्राभिन्नगोस्वामी ऐसा वोधहोता है यदि एकदेशान्वयनही स्वीकारकरतेहो तो गोपदका चित्रगोस्वामीमें लक्षणा चित्रपद तात्पर्यग्राहकहै ।

ऐसेही 'आरुढो वानरो यमसौआरुढवानरोवृक्षः 'वानर' पदकी वानरकर्तृकारोहणकर्ममें लक्षणा आरूढपदको तात्पर्यग्राहकमानना चाहिये ऐसे (अन्यत्र) प्राप्ते

तत्पुरुषे तु पूर्वपदे लक्षणा । तथाहि–राजपुरुष इत्यादौ राजपदार्थन पुरुषपदार्थस्य साक्षान्नान्वयो–निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात् अन्यथा राजा पुरुष इत्यत्रापि तथान्वयबोधः स्यात् । घटः पटो न इत्यादौ घटपटाभ्यां नञः साक्षादेवान्वयान्निपातातिरिक्तेति । नीलो घट इत्यादौ नामार्थयोरभेदसम्बन्धेनान्वयाद् भेदेनेति ।

रायां नद्यामिति वाक्यबोध्या गभीराभिन्ना नदी तत्सम्बन्धस्तीरे इति तीरबोधोपपत्तिरित्याहुः ।

तन्न स्वबोध्यसम्बन्धो लक्षणेत्यत्र स्वबोध्यत्वं यदि स्वजन्यशाब्दबोधविषयत्वं तदा गङ्गायां घोष इत्यत्र लक्षणानुपपत्तिः तत्र गङ्गापदेन प्रवाहविषयकशाब्दबोधाजननेन प्रवाहस्य गङ्गापदबोध्यत्वाभावात् किन्तु शक्त्या स्वजन्यज्ञानविषयत्वं वाच्यम् एवं च वाक्ये न लक्षणासम्भवः शक्त्यभावात् ।

न च स्वजन्यज्ञानविषयत्वमात्रं स्वबोध्यत्वमस्तु शक्त्येति व्यर्थं ततश्च न दोष इति वाच्यं समवायेन घटपदस्मारितस्यापि स्वबोध्यत्वापत्तौ तत्सम्बन्धज्ञानेन घटपदेन पटादेर्बोधप्रसङ्गादित्यलम् ।

दकादिपदमें भी समझना चाहिये । अर्थात् उदककर्तृकप्राप्तिकर्ममें उदकपदकी लक्षणा प्राप्तपदको तात्पर्य ग्राहक मानना चाहिये ।

एवं तत्पुरुष समासस्थलमें पूर्वपदमें लक्षणा होती है जैसे राजपुरुषपदमे राजपदार्थका स्वत्वसम्बन्धसे पुरुषमे अन्वय नहीं होसकता क्योंकि (निपातारिक्तनामार्थका निपातातिरिक्तनामार्थके साथ साक्षाद्भेदसम्बधसे अन्बय अव्युत्पन्नहै ऐसा न माननेसे 'राजा पुरुषः' यहांपर भी स्वत्वसम्बन्धेनराजविशिष्टः पुरुषः यह बोध होने लगेगा। 'पटो न घटः' यहां पर घटका प्रतियोगितासम्बन्धेन भेदमें भेदका स्वरूपसम्बन्धेन पटमें साक्षात् भेदसम्बन्धेन अन्वयहोता है इसके लिये निपातिरिक्त विशेषणनाम में दिया नञ्निपातहै इसीसे इसकेयोगमें भेदेन अन्वयहोसकताहै नीलोघटः इसस्थलमें नामार्थ नामार्थका साक्षात् अभेदसम्बन्धसे अन्वयहोता है इसलियेनियममें भेदेन कहा अर्थात् निपातारिक्तनामार्थोका अभेदेन अन्वयबोधतो होताही है परन्तु भेदसम्बन्धसे अन्वय बोध अव्युत्पन्न है। इससे राजपुरुषः इत्यादिस्थलमें भी निपातातिरिक्त नामार्थो की उपस्थिति है अतः भेदेन अन्वय नहीं होगा ।

न च राजपुरुष इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यम् , अस्मृतविभक्तेरपि ततो बोधोदयात्। तस्माद्राजपदादौ राजसम्बन्धिनि लक्षणा, तस्य च पुरुषेण सहाभेदान्वयः ।

द्वन्द्वे तु धवखदिरौ छिन्धीत्यादौ धवः खदिरश्च विभक्त्यर्थद्वित्वप्रकारेण बुध्यते, तत्र न लक्षणा ।

न च साहित्ये लक्षणेति वाच्यम् , साहित्यशून्ययोरपि द्वन्द्वदर्शनात् ।

पुरुषेण सहाभेदान्वय इति । अन्ये तु राजपुरुष इति तत्पुरुषे न लक्षणा किन्तु राज्ञ एव स्वत्वसम्बन्धेन पुरुषेऽन्वयो व्युत्पत्तिवैचित्र्यात् अत एव 'दशैते राजमातङ्गास्तस्यैवामी तुरङ्गमा' इत्यत्र तच्छब्देन राज्ञः परामर्शः राजसम्बन्धिनि राजपदस्य लक्षणायां तु राज्ञः पदार्थैकदेशत्वात्तदा परामर्शो न स्यादिति वदन्ति ।
आकाशघटगतद्वित्वस्याकाशेऽपि सत्त्वादाकाशावित्यस्य प्रामाण्यापत्तिरतः उद्देश्यतावच्छेदकव्याप्यसंख्याबोधकत्वं सुपामिति स्वीक्रियते यदि धवत्वं खदिरत्वं च प्रत्येकमुद्देश्यतावच्छेदकं स्यात् तदा धवद्वयस्य खदिरद्वयस्य च बोधापत्तिरिति धवखदिरपदस्य धवखदिरसाहित्याश्रये लक्षणा स्वीक्रियते एवं च उद्देश्यतावच्छेदकीभूतसाहित्यव्याप्यत्वं न धवगतद्वित्वस्य नापि खदिरगतद्वित्वस्य किन्तु धवखदिरगतद्वित्वस्यैवेति न धवद्वयादेर्बोध इतिमीमांसकाः। तन्मतेनाशङ्कते—*न च साहित्ये इति* । साहि-

---

शंका—'राजपुरुषः' इत्यादि स्थलमें राजपदोत्तरवर्तिलुप्त हुई षष्ठीविभक्तिके स्मरणकी कल्पना कर उस विभक्तिका अर्थ जो स्वत्व है उसमें राजपदार्थका निरूपितत्व सम्बन्धेन स्वत्वका पुरुषमें स्वरूपसम्बन्धसे अन्वयकर 'राजनिरूपितस्वत्ववान् पुरुषः' यह बोध 'राज्ञः पुरुष' की तरह मानलें अतः साक्षात् नामार्थका अन्वय न होनेसे उक्त नियम का विरोध नहीं ।

उत्तर—जिस पुरुषको विभक्तिका स्मरण नहीं हुआ अर्थात् प्रकृतिप्रत्ययानभिज्ञपुरुषको भी 'राजपुरुषः' इत्यादि वाक्यसे शाब्दबोध का उदय होना अनुभव सिद्ध है इसलिये 'राजपुरुषः' इत्यादिस्थलोंमे राजादिपदों की राजसम्बन्धीमें लक्षणामानके उस सम्बन्धीका पुरुषके साथ अभेदान्वय मानना उचित है एवं च राजसम्बन्ध्यभिन्नः पुरुषः यह बोध होगा ।

'धवखदिरौ छिन्धि' इत्यादि इतरेतरयोगद्वन्द्व स्थलमें द्वितीया विभक्तिके द्विवचनार्थ द्वित्वप्रकारसे धव तथा खदिर दोनों का बोध होता है इसलिये द्वन्द्वमें लक्षणाकी कोई आवश्यकता नहीं ।

न चैकक्रियान्वयित्वरूपं साहित्यमस्तीति वाच्यम् क्रियाभेदेऽपि धवखदिरौ पश्य छिन्धीत्यादिदर्शनात्, साहित्यस्याननुभवाच्च ।

अत एव राजपुरोहितौ सायुज्यकामौ यजेयाताम्' इत्यत्र लक्षणाभावाद् द्वन्द्व आश्रीयते। तस्मात्साहित्यं नार्थः।

त्याश्रये इत्यर्थः सहवृत्तित्वरूपमेकक्रियान्वयित्वरूपं साहित्यं वा लक्ष्यमिति विकल्प्याद्यं दूषयति *साहित्यशून्येति*। सहवृत्तित्वशून्ययोर्घटत्वपटत्वयोरित्यर्थः। द्वितीयं दूषयति *नचैकेति*। *अननुभवाच्चेति*। वस्तुगत्या एकक्रियान्वयित्वरूपस्य साहित्यस्य धवखदिरयोः सत्त्वेऽप्येकक्रियान्वयित्वस्य शाब्दबोधे भानाभावादित्यर्थः।

यजेयातामिति। तथा च न्यायमालायाम्—

सायुज्यकामौ यजतोऽनेन राजपुरोहितौ ।
राज्ञः पुरोहितौ राज्ञोस्तौ वा राजात्मकावुभौ ॥
द्वयोर्द्वन्द्वसमासोवा तुल्यत्वायाग्रिमो द्वयोः ।
सिद्ध्यै द्वितीयो राजोक्तिसार्थत्वाय तृतीयकः ॥

शंका—धवखदिर उभयमें रहने वाला जो सहवृत्तित्वरूप साहित्य उस साहित्यके आश्रयमें यदि खदिर पदकी लक्षणा मानें तो हानि क्या है।

उत्तर—सहवृत्तित्वरूप साहित्यसे शून्य हिम विन्ध्यादि पदार्थोका भी 'हिम विन्ध्यौ' इत्याकारक इतरतरयोगद्वन्द्व देखा जाता है इसलिये द्वन्द्व स्थलमें उत्तर पदकी साहित्याश्रयमें लक्षणाजो मीमांसक मानते है सो ठीक नहीं।

शंका—मैं सहवृत्तित्व रूप साहित्यके तात्पर्यसे यहां लक्षणा नहीं कहता किन्तु एकक्रियान्वयित्वरूप साहित्यके तात्पर्यसे एवं च छेदन रूप जो एक क्रिया तदन्वयित्वरूप साहित्य धव तथा खदिर उभयमें विद्यमान है। इसरीतिसे खदिर पदकी लक्षणा माना जायतो हानि क्या है।

उत्तर—'धवखदिरौ पश्य छिन्धि' इत्यादि प्रयोग स्थलमें क्रियाके भेद होनेसे द्वन्द्व देखा जाता है अभिप्राय यह की एकक्रियान्वयित्वरूप साहित्य यदि नियमसे इतरेतरयोग द्वन्द्वमें रहे तो उसके आश्रयमें लक्षणा मान लीजाय परन्तु उसका तो 'धवखदिरौ पश्य छिन्धि' इत्यादि स्थलमें व्यभिचार होता है इसलिये साहित्यमें लक्षणा मानना ठीक नहीं। और वस्तुतः एक क्रियान्वयित्वरूप साहित्यकी 'धवखदिरौ छिन्धि' इस प्रयोगमें प्रतीति नहीं होती अतः लक्षणा मानना व्यर्थ है।

इसीसे 'राजपुरोहितौ सायुज्यकामौ यजेयाताम्' अर्थात् सायुज्यकी कामनावाले

किन्तु वास्तवो भेदो यत्र तत्र द्वन्द्वः । न च नीलघटयोरभेद इत्यादौ कथमिति वाच्यम्, तत्र नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा । अभेद इत्यस्य चाश्रयाभेद इत्यर्थात ।

समाहारद्वन्द्वे तु यदि समाहारोऽप्यनुभूयत इत्युच्यते, तदाऽहिनकुलमित्यादौ परपदेऽहिनकुलसमाहारे लक्षणा, पूर्वपदं तु तात्पर्यग्राहकम् ।

न च भेरीमृदङ्गं वादयेत्यत्र कथं समाहारस्यान्वयस्तस्यापेक्षाबुद्धिविशेषरूपस्य

अव्याहत्यै चतुर्थः स्याद्वचनाद्भिन्नकल्पता ।
तनूनपान्नराशंसौ विकल्प्येते समत्वतः ॥ इति ।

ननु यदि द्वन्द्वे लक्षणा तर्हि कर्मधारयाद् द्वन्द्वस्य भेदो न स्यादत आह *किन्त्विति । चार्थे द्वन्द्व* इति हि पाणिनोयं सूत्रं तत्र चार्थाः समुच्चयान्वाचयेतरेतरयोगसमाहारभेदाच्चत्वारः। तत्र इतरेतरयोग इत्यस्य इतरस्येतरस्मिन् योगः सम्बन्धः इतरेतरयोगः इति भेदे द्वन्द्व इति लभ्यते तत्र पदभदे, पदार्थभेदे, पदार्थतावच्छेदकभेदे, वा द्वन्द्वः नाद्यतृतीयौ नीलोत्पलमित्यत्र पदभेदस्य पदार्थतावच्छेदकभेदस्य च सत्त्वेन द्वन्द्वप्रसङ्गात् परिशेषात पदार्थभेदे द्वन्द्व इति लभ्यते ।

राजा तथा पुरोहित दोनों यजन करें इत्यादि वाक्य स्थलमें लक्षणाके अभावसे द्वन्द्वका आश्रयण मीमांसकोंने किया है इससे साहित्य किसी पदका अर्थ नहीं है।

किन्तु पदार्थ द्वयका जहां भेद हो वहां द्वन्द्व समास होता है ।

शंका—'नीलोघट' इत्यत्र नीलघटयोरभेदः इस वाक्यमें 'नीलघटयोः' यह द्वन्द्व नहीं होना चाहिये क्योंकि नील तथा घट पदार्थका भेद नहीं है ।

उत्तर—ऐसे स्थलमें नीलपदका नीलत्वमें घटपद का घटत्वमें लक्षणा मान कर नीलत्व तथा घटत्वका भेद होनेसे द्वन्द्व होसकता है ।

शङ्का—यदि नीलत्वघटत्वका भेद है तो अभेद कैसे कहते है ।

उत्तर—'अभेदः' का 'आश्रयाभेदः' अर्थ करनेसे दोष हट जायगा ।

समाहार द्वन्द्व स्थलमें यदि समाहारका अनुभव होता हो तो 'अहिनकुलम्' इहां पर नकुल पदक अहिनकुलसमाहारमें लक्षणा और अहिपद तात्पर्य ग्राहक है ।

शंका—'भेरीमृदङ्गं वादय' इहां पर भेरी मृदङ्ग समूहमें वादन कर्मता बाधित होनेसे यह प्रयोग नहीं होना चाहिये क्योंकि अपेक्षाबुद्धिविशेषरूपसमूह वादनक्रियाका कर्म नहीं बन सकता ।

वदनासम्भवादिति वाच्यम्, परम्परासम्बन्धेन तदन्वयात्। एवं पञ्चमूलीत्यादावपि।

परे तु अहिनकुलमित्यादौ अहिर्नकुलश्च बुध्यते प्रत्येकमेकत्वान्वयः। समाहारसंज्ञा च यत्रैकत्वं नपुंसकत्वं च 'द्वन्द्वश्च प्राणितूर्य' इत्यादिसूत्रेणोक्तं तत्रैव, अन्यत्रैकवचनमसाध्वित्याहुः।

नन्वेवं नीलघटयोरभेद इति व्यवहारासंगतिः पदार्थभेदाभावादत आह *तत्रेति*—तथा च नीलत्वघटत्वयोराश्रयाभेद इत्यर्थ इति न दोषः।

वस्तुतस्तु पदार्थवच्छेदकभेद एव द्वन्द्वः नीलोत्पलमित्यत्र तु सहविवक्षाभावात् कर्मधारयेण वाधाद्वा न द्वन्द्वः कर्मधारयेण द्वन्द्वस्य बाधसिद्ध्यर्थमेवाकडरादेकासंज्ञेति सूत्रेआचार्थदेकासंज्ञेति न्यासोभाष्यकृता कृतः स्पष्टं चेदं लघुमञ्जूषायां प्रथमाकारके इति। एवं च नीलघटयोरभेद इति स्वरसत उपपद्यते। न चैवं घटा इत्यत्र द्वन्द्वाप्राप्त्या 'उत्सर्गसमानदेशा अपवादा' इतिन्यायेन द्वन्द्वापवाद एकशेषो न स्यादिति वाच्यम्। सरूपसूत्रस्य हरी इत्यत्र चारितार्थ्येन घटा इत्यत्रैकशेषाभावेऽपि क्षत्यभावात् घटपदेनैव अर्थतन्त्रमाश्रित्य नानाघटोपस्थितिसम्भावात् न च सकृदुच्चरितः शब्दःसकृथं गमयतीति व्युत्पत्तिविरोध वाच्यम्। अर्थः वृत्तिजन्योपस्थितिविषयः। तत्र वृत्तौ सकृदित्यस्यान्वयेन सकुदुच्चरितः शब्दः एकवृत्तिजन्योपस्थितिविषयं बोधयतीत्यर्थात् एकशक्त्या नानाघटोपस्थितौ वाधकाभावादिति ध्येयम्।

परम्परासम्बन्धेनेति। स्वविषयवृत्तित्वरूपेणेत्यर्थः स्वं समाहारः।

अहिनकुलमित्यत्र अहिनकुलमात्रप्रतीतेर्नोत्तरपदे समाहारलक्षणा न वा शक्तिरित्यभिप्रायेणोक्तं *यदीति।

उत्तर—ऐसे स्थलमें स्वविषयवृत्तित्वरूपपरम्परासंबन्धसे वादनक्रियाका समाहारमें अन्वय है यहां 'स्व' शब्दसे अपेक्षाबुद्धिविशेषरूपसमाहार उसका विषय भेरीमृदङ्गादि तद्वृत्तित्व वादनरूप क्रियाको इति ऐसे परम्परासंबन्धसे अन्वय हो सकता है।

ऐसे पञ्चमूली इत्यादि द्विगवर्थसमाहारमें भी उत्तर पदकी समाहारमें लक्षणा पूर्वपदतात्पर्यग्राहक मानना उचित है।

'परे तु' नवीन नैयायिक तो यह मानते हैं कि 'अहिनकुलम्' इत्यादि स्थलमें अहि तथा नकुल दोनोंका बोध होता है किन्तु समाहारका बोध नहीं होता और एक वचनबोधित एकत्व संख्याका अहि तथा नकुल प्रत्येक के साथ अन्वय है किन्तु समाहार संज्ञा वहां होती है जहां एक वचनान्तता तथा नपुंसकता 'द्वन्द्वश्च प्राणि-

पितरौ श्वशुरावित्यादौ पितृपदे जनकदम्पत्योः, श्वशुरपदे स्त्रीजनकदम्पत्योर्लक्षणा। एवमन्यत्रापि। घटा इत्यादौ न लक्षणा—घटत्वेन रूपेण नानाघटोपस्थितिसम्भवात्।

कर्मधारयस्थले तु, नीलोत्पलमित्यादावभेदसम्बन्धेन नीलपदार्थ उत्पलपदार्थे प्रकारः। तत्र च न लक्षणा।

अत एव 'निषादस्थपतिं याजयेत्' इत्यत्र न तत्पुरुषो लक्षणापत्तेः, किन्तु कर्म-

---

निषादस्थपतिं याजयेत् इति। तथा च न्यायमालाविस्तरे माधवः—

द्विजः स्थपतिरन्यो वा, द्विजः षष्ठीसमासतः।
कर्मधारयमुख्यत्वान्निषादो रौद्रमागकृत्॥

अयमाशयः *वास्तुमयं रौद्रं चरुं निर्वपेत् इति* प्रकृत्य श्रूयते *एतया निषादस्थपतिं याजयेदिति* तत्र रौद्रेष्टौ यागकर्तृत्वं निषादस्य स्थपतिरिति विग्रहेण कस्य चित् त्रैवर्णिकस्य, निषादश्चासौ स्थपतिश्चेति विग्रहेण संकरजात्यवच्छिन्नस्य वेति संकरजातिविशेषावच्छिन्नस्य शूद्रतया वेदानधिकारात् षष्ठीतत्पुरुषस्यैवौचित्येन त्रैवर्णिकस्यैवेति पूर्वपक्षे पूर्वपदस्य निषादसम्बन्धिनि लक्षणायाँ गौरवात् लाघवात् कर्मधारयस्यौचित्येन संकरजातिविशेषावच्छिन्न एव कर्तेति सिद्धान्तः ततश्च श्रुतिवलात् तात्कालिकाचार्योपदेशादिना विद्यां संपाद्य धनिको निषादो रौद्रयागं कुर्यादिति तात्पर्यम्।

ननु—

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः॥

तूर्यसेनाङ्गानाम् २। ४। २।' इत्यादि सूत्रसे बोधित हो एवं समाहारके उदाहरण 'पाणिपादम्' आदि जानना। (अन्यत्र) समाहारातिरिक्तस्थलमें यदि एकवचन हो तो असाधु जानना ऐसा कहते हैं।

एवं 'पितरौ' 'श्वसुरौ' इत्यादि एकशेषस्थलमें पितृपदकी स्वजनक माता पिता दोनोंमें लक्षणा श्वसुर पदकी स्त्रीके जनक माता पिता दोनोंमें लक्षणा है। ऐसेहि और स्थलोंमें भी जान लेना घटा इत्यादि प्रयोगस्थलमें लक्षणा नहीं है क्योंकि घटत्वेन रूपेण नाना घटकी उपस्थिति घट पदसे हो सकती है।

एवं 'नीलोत्पलम्' इत्यादि कर्मधारयस्थलमें नील पदार्थ उत्पल पदार्थमें अभेद संबन्धसे प्रकार है इसलिये यहां भी लक्षणा नहीं है।

'अत एव' कर्मधारयस्थलमें लक्षणा न होनेसे ही 'निषादस्थपतिं याजयेत्'

धारयो लक्षणाभावात्।

न च निषादस्य सङ्करजातिविशेषस्य वेदानधिकाराद्याजनासम्भव इति वाच्यम्, निषादस्य विद्याप्रयुक्तेस्तत एव कल्पनीयत्वात्। लाघवेन मुख्यार्थस्यान्वये तदनुपपत्त्या तत्कल्पनायाः फलमुखगौरवतयाऽदोषत्वादिति।

इति स्मृत्या याजनस्य ब्राह्मणजीविकात्वेन परिगणनात्तत्र रागत एव प्रवृत्तिसम्भवाच्छ्रुत्या याजनस्य विधानमनुपपन्नमिति चेन्न याजयेदित्यस्य यजेदित्यत्रैव तात्पर्येणादोषात् शूद्रस्य अज्ञतया यागे प्रवृत्त्यसम्भवात् ब्राह्मणस्य प्रवर्तकतया याजयेदित्युक्तेरिति सर्वं समञ्जसम्।

तत्पुरुषइति । षष्ठीतत्पुरुष इत्यर्थः यथाश्रुतं तु न युक्तम् । कर्मधारयस्यापि तत्पुरुषत्वादिति।

*लक्षणापत्तेरिति । ननु लक्षणाकल्पनं न दोषः निषादानां स्थपतिरिति षष्ठीसमासे निषादसम्बन्ध्यभिन्नस्थपतिविषयकबोधाय लौकिकवाक्ये लक्षणयाः क्लृप्तत्वात्। तदनुरोधेन न तादृशशाब्दबोधे लक्षणाज्ञानहेतुत्वकल्पनप्रयुक्तं गौरवमपीति चेन्न—

इत्यादि श्रुतिवाक्यस्थलमें निषादानां स्थपतिः निषादस्थपतिः इत्याकारक तत्पुरुषसमीसका आश्रयण मीमांसकोंने नहीं किया है क्योंकि तत्पुरुष माननेसे पूर्वोक्त रीतिसे तत्पुरुषस्थलमें लक्षणा माननी पड़ेगी और लक्षणा जघन्यवृत्ति है यदि प्रकारान्तर (शक्तिवृत्ति) से निर्वाह होसके तो लक्षणा स्वीकार उचित नहीं । एवं 'निषादश्चासौ स्थपतिश्च निषादस्थपतिः' यह कर्मधारय समास ही उचित है क्योंकि कर्मधारयमें लक्षणा नहीं माननी पड़ती ।

शङ्का—स्थपति शब्द स्वामीका वाचक है एवं इस वाक्यमें कर्मधारय समास माननेसे निषादरूपस्थपतिका ग्रहण होगा परन्तु उसका शूद्र होनेसे यागमें अधिकार ही नहीं इसलिये तत्पुरुष समास द्वारा निषादोंके स्वामी किसी ब्राह्मण या क्षत्रियका ग्रहण करना उचित है ऐसा करनेसे वाक्य सार्थक होगा।

उत्तर—निषादको याजनके लिये यथासंभव वेदविद्याप्रयुक्ति भी इसी वाक्य से कल्पना करनेसे कार्य निर्वाह हो सकता है अतः षष्ठीतत्पुरुष मानना चाहिये ।

शंका—निषादको वेदविद्याकी कल्पना करनेमें आपको गौरव होगा ।

उत्तर—कर्मधारय समास द्वारा प्रथम मुख्यार्थके साथ अन्वय होनेके पीछे उस अन्वयकी अनुपपत्तिसे निषादको विद्याकी कल्पना करनी फल मुख गौरव है इसलिये वह दोषकर नहीं हैं।

उपकुम्भमर्धपिप्पलीत्यादौ परपदे तत्सम्बन्धिनि लक्षणा, पूर्वपदार्थप्रधानतया चान्वयबोध इति । इत्थञ्च समासे न क्वापि शक्तिः—पदशक्त्यैव निर्वाहादिति ।

आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ॥ ८२ ॥

कारणं, संनिधानं तु पदस्यासत्तिरुच्यते ।

आसत्तिरिति। आसत्तिज्ञानं योग्यताज्ञानमाकाङ्क्षाज्ञानं तात्पर्यज्ञा च शाब्दबोधे कारणम् ।

तत्रासत्तिपदार्थमाह—संनिधानं त्विति । अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानमासत्तिः तज्ज्ञानं शाब्दबोधे कारणम् , क्वचिद्व्यवहितेऽप्यव्यवधानभ्रमाच्छाब्दबोधादिति केचित् ।

वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं लक्षणाज्ञानव्यक्तिकल्पनागौरवस्यैव दोषत्वमित्याशयात। न च वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं शक्तिज्ञानव्यक्तिकल्पनं तव, मम च लक्षणाज्ञानव्यक्तिकल्पनमिति किं गौरवमिति वाच्यम् । शक्यसम्बन्धरूपलक्षणाज्ञानव्यक्तिं कल्पयतस्तव शक्तिज्ञानव्यक्तिकल्पनाया आवश्यकत्वात् । मम शक्तिज्ञानमात्रस्यैव कल्पनेन लाघवादित्यलम् ।

आसत्तिज्ञानमिति । अयं भावः । 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यत्र गिरिपदाग्निमत्पदयोरव्यधानभ्रमेण शाब्दबोधदर्शनात् स्वरूपसत्या आसत्तेर्न शाब्दबोधे कारणत्वं किन्तु आसत्तिज्ञानस्यैवेति ।

ननु आसत्तिर्योग्यतेति मूलकारिकापाठात् आसत्तिरित्यस्य समसाघटकत्वेन तस्य

'उपकुम्भम्' अर्धपिप्पली' इत्यादि प्रयोगस्थलोंमें कुम्भ पिप्पली आदि परपदों की कुम्भ पिप्पली आदिके संबन्धीमें लक्षणा माननो एवं 'कुम्भसम्बन्ध्यभिन्नं समीपम्' तथा 'पिप्पलीसंबन्ध्यभिन्नमर्द्धम्' इत्याकारकपूर्वपदार्थप्रधानशाब्दबोध ऐसे स्थलोंमें हो सकता हैं (इत्थं च) इस पूर्वोक्तरीतिसे वैयाकरणोंके अभिमतसमास शक्ति नहीं बन सकती क्योंके सर्वत्र समासघटकीभूतपदशक्ति ही से निर्वाह हो हो जायगा ।

आसक्तिज्ञान, योग्यताज्ञान, आकांक्षाज्ञान, तात्पर्यज्ञान, ये चार शाब्दबोधके प्रति कारण है ।

उन शाब्दबोधकारणोंमें 'सान्निधानं तु' इत्यादि ग्रन्थसे मूलकार आसत्ति पदार्थको कहते हैं ।

वस्तुतस्तु अव्यवधानज्ञानस्यानपेक्षितत्वात् यत्पदार्थेन यत्पदार्थस्यान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणम् । तेन गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौ न शाब्दबोधः । नीलो घटो द्रव्यं पट इत्यादावासत्तिभ्रमाच्छाब्दबोधः । आसत्तिभ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः ।

ज्ञानपदेनान्वयासम्भवादासत्तिज्ञानमित्यर्थकरणमयुक्तमिति चेद् ।

न आसत्तियोग्यतेतिनिर्विभिक्तिपाठस्यैव साम्प्रदायिकत्वात् आसत्तिरितिप्रथमान्तपाठे तु आसत्तिपदमासत्तिज्ञाने लाक्षणिकमिति ध्येयम् ।

केचिदित्यन्तेनोक्तं मतं दूषयति—*वस्तुतस्त्विति ।

ननु 'नीलो घटो द्रव्यं पटः' इत्यत्र नीलपदार्थपटपदार्थयोर्यत्रान्वयो वक्तुस्तात्पर्यविषयस्तत्रनीलपदघटपदयोरासत्तिर्न स्यात् तत्तत्पदार्थान्वयस्य तात्पर्यविषयत्वाभावादतस्तत्रेष्टापत्तिमाह—*नीलो घट इत्यादिना* ।

तर्हि तत्र नीलो घट इति कथं शाब्दबोधः इत्याह—*भ्रमाच्छाब्दबोधः इति तथा च भ्रमाच्छाब्दबोधमात्रं न तु तत्रासत्तिरिति तत्त्वम् ।

ननु तत्र यद्यासत्तिभ्रमस्तदा शाब्दबोधः भ्रमात्मकः स्यान्न चेष्टापत्तिः घटे नीलस्य सत्त्वेन विषयबाधाभावात् आसक्तिभ्रमाच्छाब्दप्रमाङ्गीकारे चासत्तिभ्रमाच्छाब्दभ्रम इति प्राचीनगाथाविरोध इत्यत आह *आसत्तिभ्रमादिति*। आसत्तिभ्रमस्य न शाब्दभ्रमजनकत्वं, प्राचीनगाथा तु निर्युक्तिकत्वादश्रद्धेयैवेति भावः ।

पदोकें परस्पर सन्निधि (सामीप्य) का नाम आसत्ति है ।

जिस पदार्थके साथ अन्वय अपेक्षित हो उन दोनों पदोंकी (अव्यवधानेन) अव्यवहित रूपसे उपस्थिति शाब्दबोधमें कारण है इसलिये 'गिरिर्भुक्तमग्निमानदेवदत्तेन' इत्यादि वाक्यसे शाब्दबोध नहीं होता क्योंकियहां गिरिपदार्थ तथा भुक्त पदार्थका परस्पर अन्वयबोध वक्ताके तात्पर्यका विषय नहीं । किन्तु गिरिपदार्थ अग्निमतपदार्थका अन्वयबोध वक्ताके तात्पर्यका विषय है। परन्तु वे दोनों पद परस्पर अव्यवहित नहीं इससे आसत्ति नहीं अतः शाब्दबोध नहीं होता ।

शंका—'नीलो घटो द्रव्यं पटः' इत्यादि वाक्यस्थलमें नीलपदार्थ तथा पट पदार्थके परस्पर अन्वयबोधमें वक्ताका तात्पर्य है इससे नीलपद तथा घटपदकी आसत्ति नहीं इससे नीलाभिन्नो घटः यह शाब्दबोध नहीं होना चाहिये ।

उत्तर—उक्तस्थल में नीलपद तथा घटपदकी आसत्ति न होने पर भी श्रोताको आसत्ति भ्रम है अतः शाब्दबोध हो जाता है । आसत्तिभ्रमसे शाब्दबोधभ्रम न

ननु यत्र छत्री कुण्डली वासस्वी देवदत्त इत्याद्युक्तं तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशादव्यवधानेन तदुत्तरपदस्मरणासंभवादिति चेद्—

न प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य तावत्पदविषयकस्मरणस्याव्यवधानेनोत्पत्तेः । नानासंनिकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि सम्भवात् । कथमन्यथा नानावर्णैरेकपदस्मरणम् ।

नन्वव्यधानेन पदोपस्थितिः शाब्दबोधे कारणमित्ययुक्तम् अनेकपदघटितवाक्यस्थलेऽव्यवधानेन पदोपस्थित्यभावादित्याशङ्कते *नन्विति* ।

नानासन्निकर्षैरिति । यथा घटचक्षुःसंयोगस्य पटप्रत्यक्षे कारणत्वाभावेऽपि घटचक्षुःसंयोगाभ्यामेकं घटपटाविति समूहालम्बनात्मकं प्रत्यक्षं जायते तथा तत्पदगोचरसंस्कारस्य भिन्नविषयकत्वांशेऽजनकत्वेऽपि तत्तत्संस्कारजन्यमेकमेव स्मरणं जायते बाधकाभावादिति भावः ।

भी हो तो कोई हानि नहीं ।

शंका—आप अव्यवधानसे पदोंकी उपस्थितिको शाब्दबोधमें कारण कहते हैं परन्तु जहां 'छत्री कुण्डली वासस्वी देवदत्तः' इत्याकारक अनेक पदघटित वाक्य वक्ता कहा वहां 'योग्यविभुविशेषणानां स्वोत्तरवर्त्तिगुणनाश्यत्वात्' इस सिद्धान्त से उत्तरपदके स्मरणसे पूर्वपदके स्मरणका नाश हो जाता है इससे अव्यवधान रूपसे उत्तरपदका स्मरण नहीं हो सकता अतः शाब्दबोध नहीं होना चाहिए ।

उत्तर—प्रत्येक पदके अनुभवसे उत्पन्न संस्कारोंसे अन्तिम पद श्रवण कालमें तावत्पदविषयकसमूहालम्बनात्मक स्मरण हो जायगा अतः शाब्दबोधमें कोई क्षति नहीं। जैसे एकही कालमें घटचक्षुःसंयोग तथा पटचक्षुःसंयोगरूप नाना सन्निकर्षोंसे 'घटपटौ' इत्याकारक एकही प्रत्यक्ष होता है वैसेही नाना पदोंके संस्कारोंसे एकही स्मरणकी उत्पत्ति हो सकती है पूर्वपदोंके संस्कारसहित जो अन्तिमवर्णका ज्ञान वहीं उस स्मरणमें उद्बोधक है यदि नाना संस्कारोंको एक स्मरण जनकता न मानी जाय तो नाना वर्णोंके प्रत्येक संस्कारोंसे नानावर्णविषय एकपदज्ञान कैसे हो सकेगा अर्थात् नहीं होना चाहिए एवं ऐसे माननेसे सर्वत्र शाब्दबोधकी अनुपपत्ति होगी इसलिये प्रत्येक स्थलमें पदजन्यपदार्थोपस्थितिसमूहालम्बनात्मक ही शाब्दबोध मात्रमें कारण है ।

परन्तु यावत्पदार्थानां स्मरणादेकदैव खले कपोतन्यायेन तावत्पदार्थानां क्रिया-कर्मभावेनान्वयरूपः शाब्दबोधोभवतीति केचित्—

वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति ।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति ॥

परेतु—

यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ॥

अन्यथेति । नानासंस्काराणानामेकस्मरणजनकत्वाभावे इत्यर्थः ।

नन्वाशुभङ्गुराणां क्रमिकाणां पदजन्यपदार्थोपस्थितीनामपि मेलनं न सम्भवति अतः सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिः समूहालम्बनात्मिकैव कारणम् । एवं चैकदैवमिति रीत्या, विशिष्टबुद्धिजनकस्य विशेषणतावच्छेदकप्रकारकनिर्णयस्य पूर्वमभावादिति प्राचीनमतं दर्शयति *परं त्विति* ।

एकदैवेति । न तु घटमानयेत्यादौ प्रथमं घटीया कर्मता इत्येवं बोधस्तदनन्तरं च घटकर्मकमानयनमिति बोध इत्यादि क्रमेणेत्यर्थः ।

वृद्धा युवान इत्यस्य तदाहुरित्यादिः । अत्र वृद्धयुवशिशुभिः कपोतैश्चिरतरचिरसन्निहितकालोक्तानां पदार्थानां सादृश्यं बोध्यम् ।

यद्यदिति । घटादिपदार्थाकाङ्क्षितं घटपदोपस्थितिजन्य 'किंघटीयम्' इति जिज्ञासाविषयीभूतं योग्यं योग्यताज्ञानाधीनं कर्मत्वादि यद्यत् सन्निधानं प्रतिपद्यते स्वार्थोपस्थितिविषयो भवति तेन तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यते इत्यर्थः तथाच आनयनार्थरूपोपस्थितेः प्रथममेव 'घटम्' इति वाक्याद्धटीयं कर्मत्वमिति बोधो भवति तदनन्तरं

'परन्तु' यहां कई एक प्राचीन लोक कहते हैं कि उन २ पदजन्य पदार्थोंके स्मरण से एक कालावच्छेदेन ही 'खलेकपोतन्यायेन' उन२ पदार्थोंका क्रियाकर्मभावसे अन्वयरूप शाब्दबोध हो जाता हैं । अर्थात् जैसे वृद्ध युवा वाल कपोत खरिहानमें सभी एक ही कालमें ऊपरसे उड़ते २ गिरते हैं वैसे ही सभी पदार्थ एकही कालमें उपस्थित होकर परस्परमें अन्वयको प्राप्त होते हैं ।

दूसरे कोई आचार्य कहते हैं कि जो जो पद परस्पर आकाङ्क्षा योग्यता तथा सन्निधिसे युक्त हैं उन उन पदोंके साथ अन्वित हुआ पदार्थ भी उन पदोंसे ही ज्ञात हो जाता है एवं खण्डवाक्यार्थबोधके अनन्तर अर्थात् पदजन्यपदार्थबोधके अनन्तर वैसेही पदार्थस्मरणद्वारा महावाक्यार्थबोध होता है ।

तथा च खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्याहुः।

एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः । तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति ।

इदन्तु बोध्यम् । यत्र द्वारमित्युक्तं तत्र पिधेहीत्यादि पदस्य ज्ञानादेव बोधो, न

च घटकर्मकमानयनमिति महावाक्यार्थबोधः । एवं च पूर्वोक्तसमूहालम्बनात्मकं पदार्थज्ञानं विनापि निर्वाह इति भावः ।

के चित्तु वृत्त्या पदजन्यपदार्थोपस्थितिरेवासत्तिः सा च स्वरूपसती हेतुः नत्वेतादृशासत्तेः शाब्दबोधं प्रति कारणत्वे किं मानमिति वाच्यम् आनयेति वाक्यं श्रुतवतः प्रत्यक्षेण घटं पश्यतोऽपि पुंसः घटकर्मकानयनबोधापत्तेः । नचैवं 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यत्र अन्वयबोधापत्तिरिति वाच्यम् सति तात्पर्यग्रहे इष्टापत्तेः ।

नन्वेवं श्लोकेषु अन्वयप्रदर्शनानर्थक्यमिति चेन्न तात्पर्यज्ञानार्थं तदुपयोगात् वृत्त्या पदजन्यपदार्थोपस्थितिश्च स्मृतिरूपा न तु शाब्दबुद्धिरूपा तथा सति शाब्दबोधरूपाया आसत्तेः शाब्दबुद्धिं प्रति कारणत्वेऽन्योन्याश्रयप्रसङ्गात् एतेन मौनिश्लोकादौ पदाभावेन पदाव्यवधानरूपासत्त्यभवेऽपि न क्षतिरित्याहुः ।

घट इति समुदायो न वाचकः उत्पन्नानामभिव्यक्तानां वा वर्णानां समुदायस्यैकदा प्रत्यक्षासंभवात् नापि प्रत्येकं वर्णा वाचकाः द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेरतः पूर्वपूर्ववर्णानुभवजन्यसंस्कारसध्रीचीनचरमवर्णानुभवजन्यसंस्कारेणाभिव्यक्तः स्फोट एव वाचक इति वैयाकरणास्तन्मतं निरस्यति *एतेनेति* । पूर्वपूर्ववर्णानुभवजन्यसंस्कारसध्रीचनचरमवर्णानुभवजन्यसंस्कारेण क्रमिकवर्णविशिष्टपदस्मरणेनैव घटार्थबोधोपपत्तौ स्फोटाङ्गीकारो वृथेति भावः ।

लाघवेन पदजन्यदार्थोपस्थितिर्न शब्दबोधे कारणं किन्तु पदार्थोपस्थितिरेव अत एव पिधेहीत्यत्र न पदाध्यहारः किन्तु अर्थाध्याहार एवेति प्रभाकरमतं दूषयति *इदन्तु बोध्यमि* त्यादिना । पदार्थोपस्थितिमात्रस्य हेतुत्वे प्रत्यक्षोपस्थितघटादेरपि शाब्दबोधे भानापत्तिरिति भावः ।

इस पूर्वोत्तर कथनसे वैयाकरणोंका अभिमत जो वर्णोंसे अभिव्यङ्ग्य पदस्फोट है उसका खण्डन जान लेना चाहिये क्योंकि पूर्व पूर्व वर्णोंके संस्कार सहित जो अन्तिम वर्णका उपलम्भ उसीको पदव्यञ्जक माननेसे भी निर्वाह हो सकता है । पदस्फोट क्यों मानना ।

इतना यहां और जानना चाहिये कि जहां वक्ताने 'द्वारम्' इतना मात्र

तु पिधानादिरूपार्थज्ञानात्—पदजन्यतत्तत्पदार्थोपस्थितेस्तत्तच्छाब्दबोधे हेतुत्वात्। किञ्च क्रियाकर्मपदानां तेन तेनैव रूपेणाकाङ्क्षितत्वात्, तेन क्रियापदं विनाकथं शाब्दवोधः स्यात्।

तथा पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहार आवश्यकः॥

योग्यतां निर्वक्ति—

पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता॥ ८३॥

पदार्थे इत्यादिना। एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः। तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः।

नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात्प्राक्सर्वत्र न सम्भवति–वाक्यार्थ-

---

ननुतात्पर्याभावादेव न प्रत्यक्षोपस्थितघटादेर्बोधे भानं तात्पर्यसत्त्वेत्विष्टापत्तिरत-आह *किञ्चेति*।

कहा है वहां (पिधेहि) अर्थात् बन्द करो इत्यादि पदके ज्ञानसे ही शाब्दबोध होता है किन्तु द्वारके पिधान रूप अर्थके ज्ञानहीसे शाब्दवोध नहीं होगा। क्योंकि तत्तत्पदजन्यतत्तत्पदार्थोपस्थितिको तत्तच्छाब्दवोधमें हेतुता निश्चित है किंच क्रिया कर्मादि पदोंकी उस उस विशेष रूपहीसे परस्पर आकाङ्क्षा देखी जाती है किन्तु द्वारं कर्मत्वं, पिधानं कृतिः, इत्याकारक विपरीतवाक्ययोजनासे द्वारकर्मकपिधान ऐसा अन्वयबोध नहीं हो सकता एवं प्रकृतमें भी 'पिधेहि' इस क्रिया पदके विना केवल 'द्वारम्' इस पदसे शाब्दबोध नहीं होगा।

ऐसे ही यदि 'स्पृहयति' इत्यादि क्रियापदका अध्याहार न किया जाय तो 'पुष्पेभ्यः' इत्यादि कर्मपदोंमें चतुर्थी विभक्ति नहीं हो सकती क्योंकि 'स्पृहेरीप्सितः १।४।३६। सूत्रमें स्पृह धातुके योगमें संप्रदान संज्ञाविहित है इससे पदका अध्याहार आवश्यक है।

'पदार्थे' इत्यादि ग्रन्थसे मूलकार योग्यताका निरूपण करते हैं।

एक पदार्थमें अपर पदार्थके संबन्धविशेषका नाम योग्यता है। उस योग्यताका ज्ञान जहां (वह्निना सिञ्चति) नहीं है वहां शाब्दबोध नहीं होता अर्थात् सेचन क्रियाकी योग्यता जलमें है वह्निमें नहीं है इसलिये यहां शाब्दबोध नहीं होता।

शंका—प्रत्येक स्थलमें वाक्यार्थवोध अपूर्व ही होता है इससे वाक्यर्थबोधके

स्यापूर्वत्वादिति चेद्—

न—तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्य योग्यताज्ञानस्य सम्वात् ।

नव्यास्तु योग्यताज्ञानं न शाब्दबोधकारणम् । किन्तु वह्निना सिञ्चतीत्यादौ सेके वह्निकरणत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः । तदभावनिश्चयस्य लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वाच्छाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम् । योग्यताज्ञानबिलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध

अपूर्वत्वादिति । सर्वत्र शाब्दबोधात्पूर्वमनिश्चितत्वादित्यर्थः ।

'शङ्खो न पीत' इति निश्चयसत्त्वेऽपि पित्तादिदोषवशात् 'पीतः शङ्खः' इति प्रत्यक्षं जायते इत्याह-*लौकिसंनिकर्षाजन्येति* । शुक्तौ 'नेदं रजतम्' इति ज्ञानसत्त्वेऽपि मण्डूकवसाञ्जनादिदोषेण 'इदं रजतम्' इति भ्रमस्योदयादाह-*दोषविशेषेति* ।

ननु यत्र न योग्यताज्ञानं तत्र शब्दबोधापत्तिरित्यत आह *योग्ताज्ञानेति* तथा चेष्टापत्तिरिति भावः ।

पहिलेवाक्यार्थबोध रूप योग्यताका ज्ञान नहीं हो सकता यदि योग्यता का ज्ञान पहिले मान लिया जाय तो शाब्दबोधमें अपूर्वता नहीं रहती इससे योग्यता ज्ञानको शाब्द बोधमें कारण माननेकी कोई आवश्यकता नहीं ।

उत्तर—प्रत्येक स्थलमें तत्तत्पदजन्यतत्तत्पदार्थके स्मरण होनेसे योग्यताका ज्ञान कहीं संशय रूप कहीं निश्चयरूप शाब्दबोधके पहिले अवश्य विद्यमान रहता है । इससे नियत पूववर्ती होने से योग्यताज्ञानमें कारणता सिद्ध हो गई ।

और नवीन लोक तो कहते हैं कि योग्यताका ज्ञान शाब्दबोधमें कारण नहीं है 'वह्निना सिञ्चति' इत्यादि स्थलमें सेचन क्रियामें वह्निकरणत्वाभावरूप जो अयोग्यता निश्चय वह विपरीतशाब्दबोधके प्रति प्रतिबन्धक है क्योंकि पूर्ववाधस्थल उक्त रीतिसे अनाहार्याप्रामाण्यज्ञानानास्कन्दिततद्धर्मिक तदभाव का निश्चय लौकिकसंन्निकर्षाजन्यदोषविशषाजन्यज्ञानमात्रके प्रति प्रतिवन्धक है । इसलिये शाब्दबोधका प्रतिबन्धक हो सकता है ।

शंका—योग्यता ज्ञानको शाव्दबोधकारणतावादीके मतमें योग्यताज्ञानके अनन्तर एक क्षण विलम्बसे शाव्दबोध होता है अब विलम्ब न होगा ।

उत्तर—योग्यताज्ञानके विलम्बसे शाब्दबोधमें विलम्ब कहीं पर सिद्ध नहीं इससे योग्यता का ज्ञान शाब्दबोध में कारण नहीं ।

इति वदन्ति ॥ ८२ ॥ ८३ ॥

आकाङ्क्षां निर्वक्ति—

यत्पदेन विना यस्याननुभावकता भवेत् ।
आकाङ्क्षा,

यत्पदेनेति । येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेत्यर्थः । क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकाङ्क्षा ।

वस्तुतस्तु क्रियाकारकपदानां संनिधानमासत्त्या चरितार्थम् । परन्तु घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं कारणम्, तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः ।

वदन्तीति । परे तु लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिं प्रति तदभावनिश्चयत्वेन प्रतिबन्धकता न संभवति घटाभाववद्भूतलमिति निश्चयोत्तरमपि घटप्रकारकभूतलविशेष्यकचाक्षुषं मे जायतामितीच्छासत्त्वे घटादेरपि चाक्षुषसन्निकर्षात् भूतले घटचाक्षुषोत्पत्त्या व्यभिचारवारणाय तच्चाक्षुषेच्छाविरहविशिष्टतदभावनिश्चयः तत्प्रकारकचाक्षुषं प्रतिप्रतिबन्धक इति इतिविशिष्यैव प्रतिबध्यप्रतिबन्धकभावकल्पनीयः अनुमितिस्थले च तत्प्रकारकानुमितिं प्रति इच्छाविरहवैशिष्ट्यमनन्तर्भाव्यैव तदभावनिश्चयत्वेन प्रतिबन्धकता कल्पनीया परोक्षज्ञानस्याहार्यस्यानभ्युपगमाद् एवं च शब्दबुद्धौ पृथगेवायोग्यतानिश्चयस्य प्रतिबन्धकत्वं कल्पनीयमिति तदपेक्षया शाब्दबोधे योग्यताज्ञानस्य हेतुत्वकल्पने एव लाघवमिति वदन्ति ॥ ८२ ॥ ८३ ॥

क्रियाकारकपदानामिति । अयं भावः एकपदेऽपरपदवत्त्वम्—अपरपदाव्यवहितोत्तरत्वं तत्र चाव्यवधानांशस्यासत्त्यैव लाभः आसत्तेः पदाव्यवधानरूपतायाः पूर्वमुप-

---

'यत्पदेन' इत्यादि ग्रन्थस मूलकार आकाङ्क्षा का निर्वचन करते हैं

जिसपद के बिना जिस पदमें शाब्द बोध जनकता न रहे उस पदकी उस पदको साथ आकाङ्क्षा है। अर्थात् जिस क्रियादि पद के बिना जिस कर्मादि कारकपद का अन्वय बोध नही होसकता उस क्रियापद के साथ उस कारक पद की आकाङ्क्षा है क्रिया पद के बिना केवल कारक पद शाब्दबोध नहीं जनमा सकता इससे क्रिया पदके साथ कारक पद का आकाङ्क्षा है ।

वस्तुतः तो क्रिया कारक पदों की अव्यवधानरूप सन्निधि अंशका लाभ पूर्वोक्त आसत्ति से होचुका है इससे क्रिया कारक पदों की आकाङ्क्षा का पृथक् वर्णन करना उचित नहीं है (परन्तु) तथापि प्रत्ययमें प्रकृत्युत्तरत्व रूप आकाङ्क्षा आसत्ति से

अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ तु पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वात्तेनैवान्वयबोधः पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयबोधः स्यादेव ॥

वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ॥ ८४ ॥

तात्पर्यं निर्वक्ति—वक्तुरिच्छेति । यदि तात्पर्यज्ञानं कारणं न स्यात्तदा सैन्धव-

---

र्णितत्वादिति उत्तरत्त्वं च क्रियाकारकपदयोर्नापेक्षितं चैत्रः पचति पचति चैत्र इति वाक्यद्वयादपि बोधात् क्रियाकारकपदयोर्नाकाङ्क्षा किन्तुप्रकृत्यव्यवहितोत्तरत्वमे· वाकाङ्क्षा तत्राव्यवधानांशस्यासत्त्यैव लाभात्प्रत्यये प्रकृत्युत्तरत्वरूपाकाङ्क्षाज्ञानं कारणमिति ।

पृथक् है इससे आकाङ्क्षा ज्ञान भी शाब्दबोधमें कारण है । जैसे घटनिष्ठ कर्मता बोधके प्रति घट पदके अव्यवहित उत्तर (अमादि) द्वितीया विभक्ति रूप आकाङ्क्षा का ज्ञान शाब्द बोधमें कारण है एवं (घटः कर्मत्वम् आनयनं कृतिः) इत्यादिवा क्यों से 'घटमानय' वाक्यके सादृश शाब्दबोध नहीं होता ।

एवम् (अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यादि उभया काङ्क्षार्थवाक्य स्थलमें वक्ताके तात्पर्यज्ञानानुरोधसे शाब्दबोध होता है अभिप्राय यह है कि यहां 'राज' पद उत्तर संबन्धविशेष बोधिका अभी विभक्ति राज पदार्थ का पुत्र तथा पुरुष दोनों में अन्वय बोधन करती है यदि पुत्र के साथ अन्वय बोध में वक्ता का तात्पर्य है तो 'यह राजा का पुत्र आता है, 'पुरुषको हटावो' ऐसा वाक्यार्थ होगा और यदि पुरुष के साथ अन्वय में वक्ता का तात्पर्य है तो 'राजाका पुरुष आता है, आगे से अपने पुत्रको हटावो' यह वाक्यार्थ होगा एवं 'पुत्र' पदके साथ 'राज' पदका तात्पर्यग्रह होने से पुत्र के साथ अन्वयबोध होता है और 'पुरुष' पदके साथ तात्पर्यग्रह होने से पुरुष के साथ अन्वय बोध होता है ।

'वक्तुरिच्छा' इत्यादि ग्रन्थसे मूलकार तात्पर्य का निरूपण करते है ।

वक्ता श्रोता के प्रति यादृश वाक्यार्थ बोधकी इच्छासे वाक्योच्चारण किया है उस इच्छा का नाम है तात्पर्य ।

शाब्दबोध में यदि वक्ता का तात्पर्यज्ञान कारण नहीं तो "सैन्धवमानय' इत्यादि वाक्यों से कहीं यात्राप्रसङ्ग में 'अश्व' का तथा कहीं भोजनादिप्रसङ्ग में लवण का बोध होता है वह नहीं होगा ।

मानयेत्यादौ क्वचिदश्वस्यक्वचिल्लवणस्य बोध इति न स्यात् । न च तात्पर्यग्राहकप्रकरणादीनां शब्दबोधे कारणत्वमस्त्विति वाच्यम्, तेषामननुगमात् तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात्कारणमस्तु ।

इत्थं च वेदस्थलेऽपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते । न च तत्राध्यापकतात्पर्यज्ञानं कारणमिति वाच्यम्, सर्गादावध्यापकाभावात् ।

न च प्रलयं एव नास्ति कुतः सर्गादिरिति वाच्यम्, प्रलयस्यागमेषु प्रतिपाद्यत्वात् । इत्थं च शुकवाक्येऽपि ईश्वरीयतात्पर्यज्ञानं कारणम् । विसंवादिशुकवाक्ये तु

प्रलयस्येति। कार्यद्रव्यानधिकरणकार्याधिकरणकालविशेषात्मकखण्डप्रलयस्येत्यर्थः।

आगमेष्विति । 'नाहो न रात्रिर्न तमो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत्, इत्याद्यागमेष्वित्यर्थः ।

ननु वह्निना सिञ्चतीति शुकवाक्ये ईश्वरीयतात्पर्यज्ञानं न कारणं ईश्वरेच्छाया विसंवादित्वापत्तेः इत्थं च शुकवाक्येऽपीत्यसङ्गतम् अत आह *विसंवादीति* । ईश्वरेच्छाया विसंवादित्वे ईश्वरस्य सत्यसंकल्पत्वक्षतेरिति भावः ।

शङ्का—वक्ताके तात्पर्याकग्राहक जो प्रकरणादि हैं उन्ही को शाब्दबोध के प्रति कारण मानिये तात्पर्य ज्ञानको कारण मानने की क्या आवश्यकता है ।

उत्तर—प्रकरणादिकों का एक रूपसे अनुगम होना कठिन है ।

शङ्का—प्रकरणादि अपने अपने स्थलमें तात्पर्य ज्ञानका जनक है इससे 'तात्पर्य ज्ञानजनकत्वेन' प्रकरणादिको का अनुगम हो सकता है ।

उत्तर—ऐसे गुरुभूत अनुगम करने की अपेक्षा तात्पर्य ज्ञानको कारण मानने में लाघव है ।

(इत्थञ्च) ऐसे ही वेद वाक्यों मे भी तात्पर्य ज्ञानके लिये ईश्वर माना जाता है ।

शङ्का—वेद वाक्यों में अध्यापक (गुरु)ही का तात्पर्य ज्ञान शाब्दबोधमें कारण मान लिया जायतो हानि क्या ईश्वर क्यों मानना ।

उत्तर—सृष्टिके प्रथम अध्यापक नहीं रहता वहां ईश्वरही का तात्पर्यमानना पडेगा।

शङ्का—संसार कें नाशके अनन्तर सृष्टि का प्रथम काल हो सकता है परन्तु प्रलय तो नहीं होता इससे सृष्टि का प्रथम काल भी नहीं होगा ।

उत्तर—प्रलय का होना 'नाहो न रात्रिर्न नमो नभूमिर्ना सीत्तमो ज्योतिरभून्न चान्यत्' अथात् एक प्रकाशरूप (ज्योतिः) चेतन के अतिरिक्त दिनरात्रि आकाश भूमि इत्यादि कुछ भी नहीं था' इस श्रुति से सिद्ध है ।

इस रीतिसे शाब्दबोध मात्रकें प्रति तात्पर्य ज्ञानको कारण होनेसे तोता मैना आदि

शिक्षयितुरेव तात्पर्यज्ञानं कारणम् ।

अन्ये तु नानार्थादौ क्वचिदेव तात्पर्य ज्ञानं कारणम् । तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः, वेदे त्वनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः ८४

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायं सिद्धान्तमुक्तावल्यां शब्दखण्डं समाप्तम् ।

अन्येत्विति । क्वचिदित्यस्य विवरणं *नानर्थादाविति* ।

वेदेति । वेदत्वं च शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वम् ।

मीमांसेति । लाघवज्ञानात्मकस्तर्क इत्यर्थः । कपिञ्जलानालभेतेत्यत्र प्रथमोपस्थितत्वलाघवेन त्रित्वस्यैव बहुवचनार्थतानिश्चय इति भावः ।

ननु परिशोधित इत्यस्य सहकृतार्थकत्वे लाघवानन्तर्गतं सहकृतं तर्कान्तरं किमितिचेदनुमानमेवेतिगृहाण । अनुमानाकारश्च कपिञ्जलानिति वहुवचनार्थः, त्रित्वं, बहुबचनवाच्यत्वादित्येवं रूपः । तत्र च लाघवज्ञानं सहकारि चतुष्ट्वादीनामपि वहुबचनवाच्यत्वादिति तात्पर्यम् ।

आहुरिति । परे तु गृहीतनानार्थवृत्तिकपदजन्यानुभवत्वस्य तात्पर्यज्ञानजन्यतावच्छेदकत्वकल्पनापेक्षया पदजन्यानुभवत्वस्य तात्पर्यज्ञानजन्यतावच्छेदकत्वकल्पने लाघवात् तात्पर्यसंशयस्थले शाब्धबोधाननुभवाच्च शाब्दबोधमात्रे तात्पर्यज्ञानस्य हेतुत्वं कल्पानीयं ततश्च वेदस्थले तात्पर्यज्ञाना भावेनार्थनिर्णय इति वदन्ति ॥ ८४ ॥

शाब्दत्वं च यां कांचित् शाब्दव्यक्तिमादाय तद्व्यक्तिवृत्तित्वे सति यां कांचित् प्रत्यक्षव्यक्तिमादाय तदवृत्तिमत्त्वम् ।

इति न्यायव्याकरणाचार्य सूर्यनारायण शुक्लविरचित मुक्तावलीमयूखे शब्दखण्डं सम्पूर्णम् ।

के वचनोंमें भी ईश्वर ही का तात्पर्य ज्ञान कारण है परन्तु जहां तोता मैना मिथ्या वाक्य उच्चारण किये है वहां सिखलाने वाले पुरुषका तात्पर्य ज्ञान शाब्द बोधमें कारण है।

अन्य लोक तो तात्पर्य ज्ञानकी सर्वत्र शाब्दबोधमें कारणता नहीं मानते किन्तु 'सैन्धवमानय' इत्यादि नानार्थक पद घटित वाक्यजन्य शाब्द बोधही में कारण मानते है। एवं च शुक वाक्य से वक्तृतात्पर्यज्ञानके विना भी बोध हो जायगा और वेद वाक्यों मे भी ईश्वर का तात्पर्य मानने की कुछ आवश्यकता नहीं । किन्तु अनादि गुरुपरम्परा प्राप्त (मीमांसा) लाघवज्ञानात्मकतर्कके सहकारसे अर्थ का निश्चय होता है इति ।

इति न्यायव्याकरणाचार्य सूर्यनारायणशर्मशुक्लविरचित मुक्तावली शब्दखण्ड भाषाटीका समाप्त ।

...wan's Sri Sankarach... Sanskrit ... Bharatiya Vidya ... (5)

काव्यमीमांसा–चन्द्रिकाटीका सहित ।

इसके टीकाकार गवर्नमेंट संस्कृत कालेज सरस्वती भवन लाईब्रेरी के पुस्तकाध्यक्ष साहित्याचार्य पं० श्रीनारायणशास्त्रीखिस्तेजी हैं । विषय विवेचन के साथ ही साथ उदाहरण श्लोकों की व्याख्या भी विशदरूप से की गयी है । टीका अत्यन्त सुबोध तथा सरल हैं जो कि विद्यार्थियों के अत्यन्त उपयोग की हुई है ।

१ से ९ अध्याय का प्रथमभाग का मूल्य लागत मात्र ॥)

काव्यमीमांसा–

मधुसूदनी विवृत्ति तथा बालक्रीडानामक हिन्दी अनुवाद सहित ।

इसके टीकाकार तथा अनुवादकर्ता मारवाड़ी संस्कृत महाविद्यालय के साहित्य-शास्त्र के प्रधानाध्यापक साहित्याचार्य पं० श्रीमधुसूदनशर्माजी हैं । संस्कृतटीका तथा हिन्दी अनुवाद हो जाने से विद्यार्थियों के बड़े उपयोग की पुस्तक होगई है ।

१ से ९ अध्याय का प्रथम भाग का मूल्य ॥)

वृत्तरत्नाकरः–

नारायणीटीका तथा वैजनाथशास्त्री वरकलेकृत परीक्षोपयोगि टिप्पणी। उदाहरण तथा श्रुतबोध–छन्दोमञ्जरी सुवृत्तितिलक सहितः ।

यों तो वृत्तरत्नाकर के आज तक अनेक संस्करण छप चुके हैं लेकिन हम प्रतिज्ञा के साथ लिखते हैं कि इस संस्करण के समान दुसरा कोई भी संस्करण परीक्षोपयोगि नहीं है ।

मूल्य लागत मात्र १॥)

किरातार्जुनीयम्–सुधानाम्निव्याख्या सहितम् ।

सर्व प्रथम पात्र–परिचय–संक्षिप्तकथा तथा प्रत्येक श्लोक में क्रमशः अवतरण-श्लोक–मल्लिनाथीटीका–अन्वयः–"सुधाव्याख्या"–कोशः–समासादि –व्याकरण–वाच्य-परिवर्त्तन तात्पर्यार्थः–भाषार्थः–तथा जहां तहां उपयुक्त टीप्पणीयां–शिक्षासङ्ग्रह–परीक्षोपयोगि प्रश्नपत्र भी दिये गये हैं आज तक किरात १ से ३ सर्ग का इतनी उत्तम परीक्षोपयोगि टीकायें तथा मल्लिनाथी टीका सहित का संस्करण दूसरा अन्यत्र कहीं नहीं छपा ।

१ से ३ सर्ग का मूल्य लागत मात्र ।॥)

प्राप्तिस्थान–चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी ।

नागानन्द—नाटक—भावार्थदीपिक

हिन्दीअनुवाद सहित ।

यह नाटक श्रीहर्षदेव की अद्भुत रचना है । इस नाटक
अर्थों की गम्भीरता तथा भावों की मनोहरता देखने ही योग्य है
बड़ी विचित्रता है वस्तु का विन्यास-परोपकार के लिये अपने
करने वाले नायक का अनुपम चरित्र । ऐसे सुन्दर नाटक की आज तक विद्यार्थि
योग्य कोई व्याख्या नहीं थी । इसी अभाव की पूर्त्ति करने के विचार से हमने
एक नवीन व्याख्या भावार्थदीपिका कराई है । व्याख्याकार हैं हिन्दुविश्वविद्यालय
संस्कृत प्रोफेसर साहित्याचार्य पण्डित बलदेव उपाध्याय जी० एम० ए० ।
नाम के अनूरूप ही है । भाव तथा अर्थ का निरूपण तो किया ही गया है,
साथ अन्य कवियों की समानार्थक सूक्तियों का भी स्थान पर सन्निवेश किया
आरंभ में ५० पृष्ठोंका एक पाणिन्य पूर्ण उपोद्घात है जिसमें नाटक सम्बन्धि
ज्ञातव्य विषयों का वर्णन किया गया है । नाटक का स्वरूप, नायक, रस आ
समुचित विवेचन है । नागानन्द की कथा का मूल क्या है ?-यह कथा कहां
गई है ? साथ ही साथ कविने कौन कौन से परिवर्त्तन किये हैं ? इन सब का यथा
निरूपण है । श्रीहर्ष का जीवन वृत्त, काल, निर्णय, ग्रन्थ, सभा पण्डित, नागान
विशद समीक्षा आदि अनेक परीक्षोपयोगि विषयों का समुचित विवेचन है । क
सारांश भी दे दिया गया है । अन्त में समग्र नाटक का हिन्दी में अनुवाद भी
जिससे विद्यार्थियों के और भी उपयोग का ग्रन्थ होगया है । नागानन्द पर इ
उत्तम परीक्षोपयोगि टीका तथा हिन्दी अनुवाद का संस्करण आज तक अन्यत्र
प्रकाशित हुआ । ऐसे सुन्दर पौने तीन सौ २७५ पृष्ठों के ग्रन्थ का मूल्य भी ब
अल्प लागत मात्र रखा गया है । १॥

रघुवंशमहाकाव्यम्—सुधानाम्निव्याख्या सहितम् ।

प्रत्येक श्लोक में क्रमशः अवतरण-श्लोक, सञ्जीविनी-अन्वयः-"सुधाव्याख्या"
कोशः-समासादि-व्याकरण-वाच्यपरिवर्तन-तात्पर्यार्थः-हिन्दीभापार्थः तथा जहां त
पौराणकीयकथायें-उपयुक्त टीप्पणीयां-संक्षिप्तकथायें आदि उपयुक्त विषय दिये
तथा ग्रन्थ समाप्ति में परीक्षोपयोगि प्रश्नपत्र भी दिये गये हैं आज तक इतनी उ
परीक्षोपयोगि टीकायें तथा मल्लिनाथ कृत सञ्जीविनी टीका सहित का रघुवंश
नहीं छपा । ६ से १० सर्ग का मूल्य लागत मात्र

उपरोक्त "सुधाव्याख्या" सहित रघुवंश १ से ४ सर्ग का मूल्य १।) त
सर्ग का मूल्य १॥) पृथक् २ संस्करण भी मिलता है ।

प्राप्तिस्थानम्—चौखम्बा संस्कृत पुस्तकालय, बनारस